1. मृच्छकटिकम्   3. महाकाविकल्पकुरङ्गमकाश्यम्

2. संस्कृतनाट्यशास्त्रविद्यायाम्, 4. नाटकानामुत्पत्तिविकासः

5. कलहकथा (रामायणमाला) 6. वाल्मीकिरामायणम्,

7. दशकुमारचरितम् 8. विशाखदत्त, 9. नीतिशतकम्

विषय - सूची

Vivek

(1) आर्षकाव्यमहत्त्वम्

संस्कृतिः संस्कृताश्रिता

1. Points बनाने

2. श्लोक याद करने

(1)	संस्कृतसाहित्यस्य महत्त्वम्	1
5.	रामायणस्य आदिकाव्यत्वम्	3
	रामायणं आदर्शं काव्यम्	5
12.	महाभारतस्य रचनाकालः नवयुवकेषु आलोचना	34

2

2. कालिदास

6	कालिदासस्य कालनिर्धारणम्	6
3.	कालिदासस्य ग्रन्थानां परिचयः	8
17	आदिकविवाल्मीकेः जीवनपरिचयः कृतयः	11
18 (13)	संस्कृतगद्यस्य क्रमिकविकासः	23

3

महाकवि कालिदास / कालिदास श्रृंगार

1	उपमा कालिदासस्य	13
19	भारवेः परिचयः कृतिः अर्थगौरवम्	
7. 4.	माघस्य परिचयः कृतिः, माघे सन्ति त्रयः गुणाः	16
8. 2	कविः पदलालित्यम्	24

काव्येषु भवभूतिः

2.	भवभूतेः परिचयः कृतिः उत्तररामचरिते करुणरसस्य विशिष्टता	29
कादम्बरी 14	बाणस्य परिचयः कृतिः बाणोच्छिष्टं जगत् सर्वम्	25
नैषध 15	श्रीहर्षपरिचयः कृतिः	27
16	अभिज्ञानशाकुन्तलम् व्याख्या	13

5

17 20	भारवेः माघस्य च तुलना	32
18	कालिदासस्य भवभूतिना तुलना	3[illegible]
19 15	वासवदत्ता, धनञ्जयम्	
20 16	हितोपदेश मृच्छकटिकम्	

स्वप्नवासवदत्तम्

22 नाटकेषु [illegible] 36

23 [illegible] 37

[illegible] 38

[illegible] 42

[illegible]

संस्कृतं द्विविधम् अस्माकम् समक्षे आयाति; वैदिकं
१) संस्कृतं लौकिक संस्कृतं च

प्र० संस्कृत-साहित्यस्य महत्वं प्रतिपादयत ?

उत्तरम् : संस्कृत शब्दस्य व्युत्पत्तिः सम् अर्थात् संस्कार-पूर्वक -कृ धातोः क्तिन् प्रत्ययेन भवति। अस्य शाब्दिकार्थः अस्ति सर्वथा शुद्धता, संस्कृतं न केवलं आदिकालस्य अपितु अनादिकालस्यास्ति। ~~यदि संस्कृतं लौकिकं संस्कृतस्य न कथ्यते~~ यदा विश्व संस्कृतिः लुप्तप्राया, सुप्तप्राया अथवा मृतप्राया आसीत्। तदा संस्कृतौ आश्रिता भारतीय संस्कृतिः पूर्णतया आत्मनिर्भरा आसीत्। पाश्चात्य विद्वांसः अपि अधुना इदं तथ्यं स्वीकुर्वन्ति यत् यदा लैटिनादय भाषाः स्वकीये जन्मकाले एव आसन् तदा एव संस्कृत भाषा यौवन परिपूर्णा सौन्दर्य सम्पन्ना च आसीत्, देवानां मुख्यं देववाणी अस्माकं देशस्य अनुपमा अमूल्या च निधिः वर्तते। अधुनापि इयं ~~भारतवासीनां~~ भारतवासीनाम् हृदयेषु भावनाः संचारयति 19 अतिप्राचीनामपि कारणात् संस्कृतस्य सम्बन्धे अस्ति यत् मानवजीवनस्य जीवनात् दूरमियं भाषा अनुपयुक्ता मृतभाषा चास्ति। एतस्य मतस्य निर्मूलाः जनाः अभारतीयाः तथा च भारतीय संस्कृतेः सर्वथा अनभिज्ञाः एव सन्ति। कर्म धर्मस्य इयं भाषा न केवलं भारते अपितु अमेरिका जर्मन इंग्लैंडादिषु समृद्धदेशेषु ससम्मानं पठ्यते पाठ्यते च। वेदानां श्रुति स्मृति ग्रन्थानां दर्शनानां तन्त्र मन्त्राणां चतुर्दश विद्यानां नैक शास्त्राणां काव्यनाटकादीनां गद्यपद्यादीनामियं भाषा अद्यापि उपयोगिनी अस्ति।

1. व्युत्पत्ति
2. तत्भूतप्राचा — 1. विदेशेषु अपि पठ्यते पाठ्यते
2. हिमाचले दक्षिणे च
3. प्राचीनता + धार्मिकता
4. सांस्कृतिकता — 1. विदेशेषु अस्य प्रसारः । 3. कम्प्यूटर योग्या
2. अत्यन्त विस्तृता ।

2.2 [संस्कृतं ज्ञान विज्ञानस्य इयं भाषा अद्युना अपि हिमाचलस्य दक्षिण भारतस्य च अनेकेषु ग्रामेषु नगरेषु च व्यवहारस्य भाषास्ति । रामायण-महाभारतस्य काले इयं भाषा जनभाषासीत् । लङ्कायामशोक वाटिकायां स्थितया सीतया सह पवनपुत्रस्य वार्तालापमस्यैव भाषाया माध्यमेन अभवत् ।

3.1 [प्राचीनता अस्य भाषायाः विश्व प्रसिद्धा अस्ति । ऋग्वेदः संसारस्य प्राचीनतमः ग्रन्थः । लोकमान्य तिलकस्य मतानुसारेण ऋग्वेदस्य रचनाकालः विक्रम संवत्सरात् अनेकानि सहस्रवर्षाणि पूर्वमस्ति

3.2- धार्मिकता संस्कृत भाषायाः मुख्य विशेषता अस्ति । भारतीयानां विशेषतः हिन्दु समाजस्य सर्वे धार्मिक कार्यकलापाः जन्मतः मरणं मृत्यु पर्यन्तं सर्वे संस्काराः संस्कृत-भाषायाः माध्यमेन एव भवन्ति । अस्यां भाषायामनेकाः धार्मिक धाराः प्रवाहिताः सन्ति । यासां माध्यमेन भारतीयानां हृदयानि मनांसि च ~~आप्ला~~ आप्लावितानि भवन्ति ।

4 [सांस्कृतिकता ~~[illegible]~~ संस्कृत भाषायाः अन्यतमा विशेषतास्ति । भारतमातुः अनेके सुपुत्राः प्राचीनकालात् विभिन्न देशेषु गत्वा अस्याः भाषायाः प्रचार-प्रसारं च कुर्वन्ति ~~[illegible]~~ । अस्याः च महत्त्वं सर्वत्र स्थापयन्ति । संस्कृत-साहित्यं तादृशं व्यापकमस्ति यत् भारतीयाः

5. साहित्यकाराः विश्वप्रसिद्धाः ,
6. पाश्चात्यैः अन्वेषणासन्धानम् — प्रशंसा च
7. वेदाः — वैदिककालस्य ज्ञानम् । दर्शन व्यावहारिकशास्त्राणि ।
8. रामायण, महाभारत (पूर्ण साहित्यस्य दिग्दर्शनम्)
9. 8. उपसंहार कालिदास, कीरात, शिशुपाल, कथा नीति स्तोत्रम्

काऽपि विद्या अनया अपरिचिता नास्ति, विभिन्न क्षेत्रेषु अस्याः भाषायाः व्यापकता सजीवता प्राचीनता दृश्यते । व्याकरण दृष्ट्या यथा इयं भाषा यावती विशुद्धास्ति तावती न विश्वस्य अन्याकाऽपि भाषा । अस्याः भाषायाः उच्चारण माध्यमेन शुद्धाशुद्धानां ज्ञानं तत्कालमेव भवति । यादृशमस्याः उच्चारणं तादृशं पठनं, पाठनं लेखनञ्च । वैज्ञानिक दृष्ट्या अपि इयं भाषा अत्युत्तमास्ति, आधुनिक युगस्य कम्प्यूटर यन्त्रस्य प्रयोगाय इयं भाषा सरला व्यावहारिकी तथा च अर्थपूर्णा अस्ति ।

व्यावहारिक

5. अस्याः भाषायाः वाल्मीकि व्यासादयः महाकाव्यकाराः कालिदासहर्षादयः काव्य नाटककाराः बाण भट्टादयः संस्कृत गद्यकाराः न केवलं भारते अपितु समस्तविश्वे सम्माननीयाः ~~[illegible]~~ आदरणीयाः, अनुकरणीयाः आसन् सन्ति, भविष्यन्ति च ।

6. संस्कृत भाषा स्वमाधुर्येण नीतिगत श्लोक प्रचारेण न केवलं मानसिकी बौद्धिकी अपितु हार्दिकी अस्ति । विश्वस्य अनेक विद्वांसः आगत्य संस्कृत भाषायाः पठन - पाठनम् अन्वेषणासंधानं कृतवन्तः । अन्याः भाषायाः प्रवाहेण प्रवाहिता भूत्वा ते अस्याः एव सञ्जाताः । अस्याः भाषायाः अनुपमं गौरवं महत्वं च अवलोक्य आत्वाय जर्मन कवि विंटरनिज महाभागः स्वकीय विश्वप्रसिद्ध ग्रन्थे कथितवान् —

~~If~~ we want to know somethings about over old History ~~and~~ culture and humanity. we must go to India. where the oldest History and culture of mankind preserved. यदा अभारतीयाः अपि इत्थं वदन्ति इमां भाषां, तर्हि कथं न भारतीयाः। कथितमपि अस्ति यत् अस्यां भाषायां विद्यते तदन्यत्रापि उपलब्धुं शक्यते परन्तु यत् अस्यां भाषायां नास्ति तस्य अन्यत्र अन्वेषणं केवलं मृगमरीचिका एव।

7. संक्षेपमात्रेण वर्णयत संस्कृत भाषायाः वैभवं दर्शयामः। अस्माकं वेदाः प्राचीन भारतस्य प्रतिबिम्बरूपाः सन्ति। वैदिक-सभ्यताकाले मानवीय सभ्यता कीदृशी आसीत् तत् वयं वैदिक ग्रन्थानां माध्यमेन एव ज्ञातुं शक्नुमः एते सर्वे ग्रन्थाः संस्कृत भाषायामेव सन्ति। वेदानां व्याख्या कृताः ब्राह्मणग्रन्थाः। आरण्यक ग्रन्थाश्च अस्यामेव भाषायामपि सुशोभिताः सन्ति। आध्यात्मिक रूपं भाषा दर्शन साहित्येऽपि दृश्यते। अस्माकं षड्दर्शनानि जैन दर्शनं, जैन दर्शनं, बौद्ध दर्शनं अपि संस्कृत भाषायामेव लिखिताः सन्ति। चतुर्दशविद्याः, सर्वाणि नीतिशास्त्राणि, अर्थशास्त्राणि न्यायशास्त्राणि च अस्यामेव प्र०2

उत्तर

93

भाषायामेव लिखिताः सन्ति । चतुर्दश विद्यानु विभिन्ना विद्या तथा च आयुर्वेदस्य ग्रन्थाः अस्यामेव भाषायाँ विभूषिताः सन्ति । लौकिक संस्कृतस्य आदि काव्यं रामायणं संस्कृतस्य एव नीधि अस्ति, विस्तृत महाभारतं संस्कृत स्यैव रचना । नीधि

कः न जानाति कालिदासं विश्व प्रसिद्धः कवि कालिदासः अनेक काव्यनाटकानां रचना अस्यामेव भाषायां रचिताः सन्ति । शाकुन्तलस्य महत्त्वं दृष्ट्वा जर्मन कविः गेटे महाभागः इदं घोषितवान

हे स्वर्गीक यदि वाञ्छसि प्रिय सखे शाकुन्तलं सेव्यताम ।

राजनीतौ संस्कृते रचितानि किरातार्जुनीयं शिशुपालवधं नैषधीयचरितं च प्रसिद्धानि । एवं विभिन्न कविभिः लिखिताः कथा ग्रन्थाः नीति ग्रन्थाः स्तोत्र ग्रन्थाः अपि अस्यामेव भाषायाँ रचिता सन्ति । किं कथयामः एतद् सर्वं तु उदाहरण मात्रम ।

अहमपि तेषु महाभागेषु एकोऽस्मि यः संस्कृत साहित्यस्य समुद्र उडुपद्वारा तर्तुं प्रयत्नशीलोऽस्मि ।

प्र०2 रामायणस्य आदिकाव्यत्वं निर्धारणीयम अथवा रामयण लौकिक संस्कृतस्य आदि काव्यमस्ति इति सतर्कः स्पष्टं क्रियताम ?

उत्तरम् :- अस्माकं साहित्यं वैदिक साहित्यं लौकिक साहित्यं च इति द्वयोः भागयोः विभक्तमस्ति । वाल्मीकि रचित

1. भूमिका — ६॥
2. तर्क — बाह्य (महद्ये रामायणस्य विषये आकार, सामग्री) आन्तरिक 3
3. उपसंहार

रामायणस्य

एक मात्रस्य रचयिता अस्ति। अस्य काव्यं लौकिक संस्कृतस्य आदि काव्यं तथा च अयं आदि कविः इति रूपेण प्रसिद्धिं प्राप्नोति। महाभारतमपि रामायणवत् प्राचीनकालमस्ति कदाचित्तु इयं भ्रान्तिः उत्पन्ना भवति यत् आदि काव्यं रामायणमस्ति अथवा महाभारतं परन्तु एक एव तर्केण अस्याः समस्यायाः समाधानं भवति यत् 1. (बाह्य) रामायणे कुत्रापि महाभारतस्य पात्राणां च उल्लेखः नास्ति परन्तु महाभारतस्य शान्तिपर्वणि रामोपाख्यानमिति नाम्ना उल्लेखोऽस्ति तस्मिन्नेव राम जीवनस्य संक्षिप्तः परिचयोऽस्ति। (क्रोड)

2. अनेकप्रमाणैः रामायणस्य लौकिक-आदि काव्यत्वं सिद्धं भवति। रामायणे अनेके प्रयोगाः एतादृशाः सन्ति यथा पाणिनी व्याकरणद्वारा पूर्णतया सामञ्जस्यं नास्ति। 3. वाल्मीकिः सर्वप्रथमं लौकिक-संस्कृते काव्यरचनामकरोत। अतः अयं लौकिक साहित्यस्य आदि कविः अस्ति। वाल्मीकिः रामायणे अनेकप्रकारैः स्वकीयं महत्वं प्रतिपादयति। अस्य आकारः प्रकारः सर्वथा परिमितमस्ति। सप्त काण्डेषु रचिते रामायणे रामजीवनस्य विशेषरूपेण वर्णनमस्ति। रामायणस्य सम्बन्धिता कथा युद्धकाण्ड पर्यन्तमेव समाप्ता भवति अन्तिमकाण्डं यद्यपि प्रसङ्गानुकूलमेव लगति। परन्तु मुख्यतया अस्मिन् राक्षसानामुत्पत्तिः रावणस्य सह इन्द्रस्य युद्धं तथा च हनुमतः बाल्य-कालस्य वर्णनमिति वर्णितमस्ति। परन्तु मुख्य

95

कथानकेन सह एतेषां प्रसङ्गानां कोऽपि सम्बन्धः नास्ति
अतः अस्य काण्डस्य सम्बन्धे इदमेव बहुमतमस्ति यत्
इदं कस्यचित् अन्यस्य अस्ति अथवा परवर्तिनि
काले एते प्रसङ्गाः रामायणे समायोजिताः सन्ति।

4. कालिदासादयः अनेके काव्यकाराः अथवा नाटककाराः
अभवन् एषां रचनानां कथानकानां मूलस्रोतः वाल्मीकि
रामायणमेव अस्ति कालिदासेन तु स्वकीये महाकाव्ये
रघुवंशे (पूर्वसूरिभिः) इति शब्दस्य सम्मानपूर्वकं
उल्लेखः कृतमस्ति। 5. रामायणस्य प्राचीनता अनेन
कारणेनापि सिद्ध्यति यत् बौद्ध ग्रन्थेषु तु अस्य
रामायणस्य उल्लेखः मिलति। एते ग्रन्थाः रामायणस्य
प्रभावेन प्रभाविताः सन्ति। 6. ग्रीक साहित्यमपि रामायण द्वारा
प्रभावितमेव लगति। 7. अनेके विद्वांसः रामायणस्य कालं
ई शतः वर्षपूर्वम् (500) इति स्वीकुर्वन्ति।
पाश्चात्याः विद्वांसः [यथा कोऽपि] विंटरनित्ज तथा च
मैकडोनिल अपि रामायणस्य आदि काव्यत्वं स्वीकुर्वन्ति

ज्ञातव्य → 1. पाटलिपुत्र नगरस्य स्थापना विक्रम संवत्सरात्
पञ्चाशत् वर्षपूर्वं मगधदेशस्य नृपतिः अजातशत्रु द्वारा
अभवत्। यद्यपि वनवासस्य जीवने भगवान् रामः
शोणनदस्य गंगायाः च संगमेन गच्छति। परन्तु रामायणे
कुत्रापि पाटलिपुत्रस्य उल्लेखोऽपि नास्ति। 2. रामायणे
मिथिला तथा च विशाला इति द्वयोः स्वतन्त्र
राज्ययोः उल्लेखोऽस्ति। 3. बौद्ध साहित्ये अयोध्या
नगरस्य कृते साकेत इति शब्दस्यापि उल्लेखोऽस्ति।
साकेत

परन्तु रामायणे कुत्रापि साकेतस्य उल्लेखः नास्ति
प्रथम शताब्द्याम् अश्वघोषोऽपि वाल्मीकि रामायणस्य
उल्लेखः कृतोऽस्ति । रामायणे दक्षिणभारतस्य अपि
सभ्यतासमाजस्य उल्लेखोऽस्ति । दक्षिणभारते आर्य-
सभ्यतायाः या अवस्था आसीत् तस्य सम्बन्धे
किम् प्रारम्भः परन्तु आर्यसभ्यताप्रसारस्य तत्र
उल्लेखः नास्ति । अतः अनेनापि इदं सिद्ध्यति
यत् आर्यसभ्यतायाः प्रसारात् पूर्वस्य रचनाऽस्ति
रामायणम् । रामायणस्य अध्ययनात् इदमपि
स्पष्टमस्ति यत् अस्माकं देशः तदानीम् अनेकेषु
लघुप्रान्तेषु विभक्तः आसीत् परन्तु महाभारते
विशालानां राज्यानामुल्लेखोऽस्ति । रामायणे
केवलं द्वयोः पद्ययोः यवन शकादीनां उल्लेखोऽस्ति परन्तु
इमौ श्लोकौ प्रक्षिप्तौ इति आलोचकाः महाभागाः
स्वीकरोति । उपसंहार अतः एतैः प्रमाणैः इदं सिद्ध्यति
यत् रामायणं बौद्ध साहित्यात् पूर्वकालस्य रचना अस्ति
अनेकानि प्रमाणानि सन्ति येषामाधारेषु वयमिदं
वक्तुं शक्नुमः यत् लौकिक संस्कृतस्य
रामायणमादि महाकाव्यं तथा च वाल्मीकिः आदिकविः ।

1, भूमिका।
2. तथ्य – श्लोक (३)
3. उपसंहार

97

103 रामायणं आदर्शकाव्यमिति प्रतिपाद्यताम् (या)
रामायणं आदर्शानां भण्डारः इति उदाहरणानां माध्यमेन स्पष्टं क्रियताम्।

भूमिका।

रामायणं मानवजीवनस्य प्राणभूतः ग्रन्थोऽस्ति, रामायणे वाल्मीकिना एतादृशाः अनेके मार्गाः प्रदर्शिताः सन्ति येषु मार्गेषु चलित्वा मानवजातिः अनन्तकालपर्यन्तं स्वजीवनस्य उद्धारं करिष्यति। लक्षणग्रन्थकाराः अनेके आचार्याः वदन्ति यत् अस्माकं चरितं रामवत् स्यात्, न तु रावणवत्। रामजीवनस्य (चरितस्य) साधुता एव तेषाम् आचार्याणां मुख्यो हेतुः अस्ति। रामायणं यत्र मानवजीवनस्य वास्तविकतां स्पष्टयति उचितम् अनुचितं च बोधयति सन्मार्गं कुमार्गं च ज्ञापयति तत्र अस्माकं जीवनस्य उद्धाराय अस्माकं समक्षे अनेकान् आदर्शान् उपस्थापयति। आदर्शपुरुषो रामः इदं कथनं विख्यातमेव। परन्तु यत्र रामस्य जीवने आदर्शानां माधुर्यं वर्तते तत्र अन्येषु पात्रेष्वपि आदर्शस्य प्रतिबिम्बं सर्वत्र दृश्यते। वयं तेष्वेव कतिपयानामादर्शानामुल्लेखमत्र कुर्मः।

(1) आदर्श राजा :-

दशरथस्य रामस्य च जीवनमादर्शनृपरूपेण प्रसिद्धमस्ति। यदा कैकेय्या वरद्वयं, नृपदशरथस्य द्विविधात्मिका स्थितिरासीत्। एकत्र पुत्रमोहः अन्यत्र राजपरम्परायाः परिपालनम्। दशरथेन मोहं परित्यज्य राजधर्मस्य परिपालनं कृतम्। सीतात्यागप्रसङ्गेऽपि रामेणापि अस्यैवादर्शस्य परिचयः दत्तः। रजकस्य कथनेन तेन

राजा पुत्र पति मित्र देवर भ्राता त्याग

दशरथराम, → रामभरत राम लक्ष्मण, राम (हनुमान सुग्रीव विभीषण) लक्ष्मण राम लक्ष्मण अपि स्वर्णमयी लंका न

११.

सीता ~~सीता~~ परित्यक्ता, न निर्गतं तस्याः सम्बन्धे किञ्चित्। प्रजायाः पालनं पितृवत् प्रजायाः रक्षणं तयोः द्वयोः नृपयोः जीवनस्य उद्देश्यमासीत् प्रजापालकस्य नृपस्य आदर्शः।

२ आदर्शपुत्रः —

रामस्य भरतस्य च जीवनं आदर्शपुत्रस्य अस्ति। रामः पितुः आज्ञां पालयति भरतः नृपः स्थानेऽपि सेवकवत् आचरति।

३ आदर्श पतिः —

रामस्य लक्ष्मणस्य च जीवनं आदर्श पतेः उदाहरणमस्ति, द्वयोः पत्न्योः जीवनमपि आदर्शस्य निदर्शनमस्ति।

४ आदर्श मित्रम् —

रामहनुमतोः, रामविभीषणयोः, रामसुग्रीवयोः च परस्परं मित्रता आदर्शस्य उदाहरणमस्ति, कुत्रापि लोभस्य दर्शनमपि न भवति।

5 आदर्श देवरः —

लक्ष्मणः सीतां मातृवत् जानाति सीतायाः आभूषणानां प्रसङ्गे लक्ष्मणस्य इदं कथनं आदर्शस्य चरमसीमास्ति —

केयूरे नैव जानामि नो जानामि च कुण्डले।
~~नूपुरे~~ नूपुरे एव जानामि नित्यं पादाभिवन्दनात्

6 आदर्श भ्राता —

राम प्रति लक्ष्मणस्य भ्रातृणां स्नेहः अनुपमः आसीत्, यदा मेघनादस्य प्रहारद्वारा लक्ष्मणः मूर्छितः जातः तदा लक्ष्मणस्य दशामवलोक्य रामस्य इदं कथनमादर्शस्य

प्रकाशिता अस्ति -

देशे-देशे कलत्राणि देशे-देशे च बान्धवाः
तं तु देशं न पश्यामि यत्र भ्राता सहोदरः ।

7 **त्यागस्यादर्शः**

रामस्य जीवनं त्यागस्य मूर्तिः अस्ति । यदा वानरसेना लङ्कां अजयत् तदा लङ्कायाः विपुलं वैभवं दृष्ट्वा लक्ष्मणस्य मनसि इयं धारणा आसीत् यत् लङ्काराज्यस्यापि विलयः अयोध्या राज्ये करणीयम् भवेत् इयं केवलं लक्ष्मणस्य मानसिकी धारणा आसीत् । रामः लक्ष्मणस्य भावं ज्ञात्वा अवदत् - अपि स्वर्णमयी लंका न मे लक्ष्मण रोचते
जननी जन्मभूमिश्च स्वर्गादपि गरीयसी ।

रामस्य अनुरागः जननी जन्मभूम्योः च प्रति आसीत् ।

एते सन्ति संक्षिप्तरूपेण रामायणस्य आदर्शाः । यदि वयं एतेषु आदर्शेषु एकमपि स्वजीवने धारयामः तेनैव कारणेन जीवनस्य सफलता निश्चिता भवति ।

प्रश्न — कालिदासस्य काल निर्धारणं तर्काणां माध्यमेन क्रियताम् ?

उत्तर — (संस्कृत साहित्ये यदा कदापि संस्कृत साहित्यस्य श्रेष्ठ कविकाराणां गणना भवति तदा सर्वप्रथमे कालिदासस्यैव नाम आयाति कथितमस्ति —

पुरा कवीनां गणना प्रसङ्गे कनिष्ठिकाधिष्ठित कालिदासः,
अद्यापि तत्तुल्यकवेरभावात् अनामिका सार्थवती बभूव ।

कविः कालिदासः काव्यानां नाटकानां खण्डकाव्यानां च माध्यमेन संस्कृत-साहित्यस्य भण्डारम् अपूरयत् । परन्तु खेदस्य

1. भूमिका | 1. कालिदासस्य साहित्ये स्थान महत्त्व

15।। 2. कालनिर्धारणम्
3. ग्रन्थ परिचयः ।

2. कालिदासमतवाद
3. रचनाविषये
4. उपसंहार

भूमिका – अलंकृतवान् (3।।)

अयं विषयः यत् अयं महान् कविः कदा कुत्र च भारत-भूमौ आसीत् इति अद्यावधि अपि अनुसन्धानस्य विषयः ।

कस्यापि कवेः रचनाकालस्य निर्धारणं द्वयोः साक्ष्ययोः आधारेण क्रियते एकः आन्तरिकाणि प्रमाणानि द्वितीयः च बाह्य प्रमाणानि । आन्तरिकाणि प्रमाणानि तस्यैव कवेः ग्रन्थेषु मिलन्ति, बाह्य प्रमाणानि तस्य परवर्तिनां रचनाकाराणां रचनानाम् आधारेण ।

कालिदासस्य स्थिति काल सम्बन्धे त्रीणि मतानि सन्ति ।

(1) कालिदासः षष्ठ शताब्द्याः (2) गुप्त काले कालिदासस्य स्थितिः (3) विक्रम संवत्सरस्य प्रारम्भे कालिदासस्य स्थितिकालः ।

1. भारते मुख्य रूपेण इयं धारणा विद्वत्सु इदानीमपि दृश्यते यत् कालिदासः वीरविक्रमादित्यस्य राजसभायाः नवरत्नेषु प्रधान रत्नम् आसीत् । कालिदासस्य ग्रन्थेष्वपि विक्रमादित्येन सह कालिदासस्य स्थितिः पुष्टा भवति । परन्तु भारतस्य इतिहासे विक्रमस्य उपाधि धारिणः चत्वारः नृपाः अभवन् इयमेव मुख्य समस्या अस्ति । यत् केन सह कालिदासस्य सम्बन्धः । 2. स्वयं कालिदासः स्वकीयः नाटकस्य नायकं शुंगवंशस्य नृपं अग्निमित्रं स्वीकरोति तस्यैव आधारेण मालविकाग्निमित्रम् नाटकम् अस्ति । 3. सप्तमे शताब्द्यां हर्षवर्धनस्य सभायाः कविः बाणभट्टः सम्मानेन कालिदासस्य स्मरणं करोति ।

101.

परवर्ती

तदनुसारं द्वितीयशताब्दीतः सप्तशताब्दी पर्यन्तं कालिदासस्य कालः अनुमीयते। 2 परन्तु एतद् केवलम् अनुमानमात्रमस्ति भारतस्य कतिपयाः विचारकाः विक्रमादित्य सम्बन्धी चन्द्रगुप्त द्वितीयेन सह योजित्वा कालिदासं गुप्तकालस्य परवर्ति इति ~~स्वीकरोति~~। स्वीकुर्वन्ति। 3. कतिपयाः विद्वांसः कालिदासं यशोवर्धनस्य राजकालः इति सिद्धं कृत्वा षष्ठशताब्दी इति तस्य कालं स्वीकुर्वन्ति परन्तु मतमिदं इदानीं ग्राह्यं नास्ति। 4. भारतीयानां तथा च पाश्चात्यानाम् अनेकेषां आलोचकानाम् मतमस्ति यत् कालिदासः प्रथमशताब्द्याम् आसीत्। शकानां विजेता वीर विक्रमादित्य एव कालिदासस्य आश्रयदाता अस्ति। ~~परन्तु~~ तथा च व्याकरणस्य प्रयोगदृष्ट्या विभिन्न स्थलेषु विभिन्नानां शब्दानां प्रयोगेण इदमेव सिद्धं भवति यत् कालिदासः प्रथमशताब्द्याम् आसीत्। अतस्तेव मतस्य इदानीं बाहुल्येन समर्थनं क्रियते।

स्थान निर्धारणम् :-

यादृशी समस्या कालिदासस्य काल सम्बन्धेऽस्ति तादृशी स्थानसम्बन्धेऽपि वर्तते। कालिदासस्य ग्रन्थेषु [illegible] कालिदासस्य सम्बन्धे अनेकमतानि दृश्यन्ते यत् कालिदासः कालिदेव्याः भक्तः आसीत्। तस्याः [illegible] पाण्डित्येन परिवर्तितः जातः। तौ द्वौ प्रति अपि कालिदासस्य स्वग्रन्थेषु अनेकस्थलेषु मतं प्रकटितं [illegible] विचारकाणाम् मतं यत् कालिदासः

वङ्ग प्रान्तस्थासीत् । तेन स्व ग्रन्थेषु उज्जयिनी-
नगरीं प्रति अपि विशेष आग्रहः प्रदर्शितः ।
उज्जयिनी नगरस्य विपुल वैभवस्य वर्णनं तस्य
ग्रन्थेषु अनेक स्थानेषु मिलति । तस्य ग्रन्थेषु
मुख्य रूपेण आदि श्लोकेषु भगवतः शिवस्य
नादरूप स्मरणमस्ति । कुमारसम्भवे शिवस्य
अनुपमा छटा अस्ति दर्शनीया । अनेन प्रसङ्गेन
कतिपयैः इदं कथ्यते यत् कालिदासः
कश्मीर प्रान्तस्थासीत् ।

3. कालिदासस्य सर्वासु रचनासु शाकुन्तलस्य
सर्वोत्तमं स्थानमस्ति अस्यैव नाटकस्य माध्यमेन
आङ्ग्ल नाटककारेण शेक्सपियर महोदयेन सह
जनाः कालिदासस्य तुलनां कुर्वन्ति । तस्य
नाटकस्याधारेण तथा च (मालती नद्याः) कण्वाश्रमस्य
च वर्णनेन पण्डित देवदत्त शर्मा शास्त्री इदं
अनेकैः प्रमाणैः उद्घोषयति यत् कालिदासः
गढदेशीय (गढ़वाल मण्डलस्य) आसीत् परन्तु
अस्य मतस्य समर्थनं विपुल माध्यमेन न जातम् ।

उपसंहार —
अतः कालिदासः कस्य कस्यापि प्रान्तस्यासीत्
वस्तुतः सः भारतीयः आसीत् विश्वे भारतीय
कवि रूपेण अस्य प्रसिद्धिरस्ति ।

(10)

प्र05 कालिदासस्य ग्रन्थानां संक्षेपेण परिचयः देयः ?

उत्तरम् :- कालिदासः विपुल प्रतिभायाः धनी आसीत् । सः कालिदासः भक्तः तथा च सरस्वत्याः पुत्रः आसीत् । तेन स्वजीवने अनेकानां रचनाभिः संस्कृत साहित्यं मण्डितम् । यद्यपि अनेके ग्रन्थाः कालिदासस्य नाम्ना प्रसिद्धाः सन्ति परन्तु निर्विवादरूपेण निम्नलिखिताः एव तस्य रचनाः सन्ति ।

(1) रघुवंशम्, कुमारसम्भवम् च एते द्वे महाकाव्ये स्तः ।

ऋतुसंहार तथा च मेघदूतं - एतद् द्वयं खण्डकाव्यम् अस्ति, अभिज्ञानशाकुन्तलं मालविकाग्निमित्रं विक्रमोर्वशीयं - इति सन्ति तस्य त्रीणि नाटकानि । एतेषां संक्षिप्तः परिचयः ~~इत्थम् अस्ति~~ इत्थम् अस्ति ।

(क) रघुवंशम् :-

वाल्मीकि रामायणे वर्णितां कथाम् आधृत्य इदं महाकाव्यं रचितम् अस्ति । मनुपुत्रः दिलीपाद् आरभ्य अग्निवर्णपर्यन्तम् अनेकेषां सूर्यवंशीयानां राज्ञाम् वर्णनम् । महाकाव्ये यद्यपि विशेषताः सर्वाः सन्ति तथापि अस्मिन् महाकाव्ये विशेषताः सन्ति । वीररसः अस्य महाकाव्यस्य मुख्यरसः । रघुवंशस्य सम्बन्धे एका इयमपि किंवदन्ती वर्तते यत् अस्य महाकाव्यस्य पञ्चविंशति सर्गाः आसन् परन्तु वल्लभदेवस्य तथा च मल्लिनाथस्य टीका केवलं एकोनविंशति सर्गपर्यन्तमस्ति तेषु ~~[illegible]~~ प्रथम नवसर्गेषु

रामस्य पूर्वजानां यथा दिलीपस्य अजस्य रघोः तथा च दशरथस्य वर्णनमस्ति । दशम सर्गात् पञ्चदशसर्ग पर्यन्तं रामस्य चरितं विस्तृतरूपेण वर्णितमस्ति । अन्तिमस्य चतुर्षु सर्गेषु रामस्य वंशजानां वर्णनं कालक्रमतः अस्ति । काव्यकला दृष्ट्या इदं महाकाव्यम् निर्विवाद रूपेण अभिनन्दनीया रचनाऽस्ति । सम्पूर्णे महाकाव्ये कवि कालिदासस्य विलक्षणं कवि कौशलं पदे-पदे दृष्टि गोचरं भवति । आरम्भे दिलीपस्य सुदक्षिणायाः तपोमयं जीवनं दृश्यते शनैः-शनैः पुनः वंशस्य वीर नृपाणां रामस्य तपस्यामहत्त्व वर्णनं उद्घाटितं भवति । ग्रन्थस्यान्ते अग्निवर्णस्य विलासिता तथा च तस्य जीवनस्य रमणीयमवसानमपि काव्यस्य चमत्कारमेव दर्शयति कथायां स्वाभाविकः प्रवाहोऽस्ति निःसंदेह रूपेण ग्रन्थोऽयं कालिदासस्य अनुपमा रचनाऽस्ति ।

2. कुमारसम्भवम् :-

कालिदासेन द्वारा विरचितमिदं ~~नवीन प्रतिभया रचना अस्ति~~ महाकाव्यम् । ~~कालिदासस्य लेखनी द्वारा प्रस्तुतमस्ति~~ शिव-पार्वत्योः पुत्रकार्तिकेयस्य कार्तिकेयस्य च जन्म यावत् अस्य कथा निबद्धा अस्ति । यद्यपि सप्तदश सर्गेषु रचितमिदं महाकाव्यमुपलभ्यते परन्तु मल्लिनाथस्य टीका केवलम् अष्टम सर्ग पर्यन्तमेव मिलति । इयमपि किंवदन्ति अस्ति यत्

कालिदासेन शिव-पार्वत्योः प्रेमणः विस्तृतं वर्णनं कृतम्
शिवपार्वतीसम्भोगवर्णनेन कालिदासस्य शरीरे कुष्ठरोगः
प्राप्तिमभवत् । अतः तेन तत्र पर्यन्तमेव अस्य ग्रन्थस्य
रचना सम्पादिता । प्रोफेसर चन्द्रशेखर पाण्डेयस्य इयमपि
दर्शनीयोऽस्ति मत् कुमारसम्भवे सुन्दरभाव व्यञ्जना
उदात्त कोमल कल्पनायाः माध्यमेन प्राकृतिकपद विन्यास
कारणेन आधुनिककवौ विशेष रूपेण अनुकूलता प्रजाते
~~[illegible]~~ । ग्रन्थस्यारम्भे हिमालयस्य कवित्वा
वर्णनं । तृतीयसर्गे च वसन्तस्यागमनं । चतुर्थे रति विला-
पकरुणे कटुवेशधारिणः शिवस्य तथा च तपस्विन्याः
पार्वत्याः संवादः कालिदासस्य प्रसाद पूर्णं शैलीकृ यति
निःसन्देहः कुमारसम्भवमपि कालिदासस्य सफला रचना
अत्र देवानां प्रेम क्रीडायाः वर्णनमस्ति वर्णनमुत्तमोऽस्ति ।
अतः अत्र कवि-भावना स्पष्ट रूपेण दर्शनीया
भणितव्या ।

3. ऋतु संहारम् :

इयं कालिदासस्य सर्वप्रथमरचना अस्ति
अतः भावप्रकाशेन दृष्ट्या भाषा दृष्ट्या च अस्मिन्
तादृशी प्रौढता नास्ति यादृशी अन्यत्र दृश्यते । ऋतु संहारं
कालिदासस्य केवलं खण्ड काव्यं गीति काव्यमपि अस्ति ।
अपितु
कतिपयाः विद्वांसः इदमपि कथयन्ति यत् इयं रचना
कालिदासस्य नास्ति यतः या प्रौढता कालिदासस्य रचनासु
दृश्यते सा अत्र न दृश्यते परन्तु तदुदाहरणम्

1. ऋतुसंहारम्
2. कुमारसम्भवम्
3. मेघदूतम् ।
4. रघुवंशम्
5. मालविकाग्निमित्रम्
6. विक्रमोर्वशीयम् ।
7. अभिज्ञानशाकुन्तलम् 9

नास्ति सरलता । इयं रचना कालिदासस्य प्राथमिक प्रयासोऽस्ति । विभिन्न ऋतूणां एकत्र साङ्गोपाङ्ग वर्णनं आरम्भेण उपलब्धं भवति । कालिदासः प्रकृत्या स्वाभाविकस्य प्रेमप्रसङ्गस्य प्रदर्शनं करोति । हेमन्त कवितायां युवक-युवत्योः, पति पत्न्योः प्रेमप्रसङ्गेन सह विभिन्न ऋतूणां परिवर्तनस्य सामञ्जस्यं दृश्यते । ग्रीष्मे सूर्यस्यातपेन दिवसः नीरसः परन्तु रात्रौ चन्द्र चन्द्रिका आनन्ददायिनी । यदा चन्द्रमा दिव्यति भूम्यां च नवीनतां प्रक्षिपति प्रेमीयुगलस्य इच्छा शोकाकुलः (चन्द्रमा तिरोहितः) भवति । वर्षाकालः नृपवत् आयाति हस्ती रूपेषु मेघेषु स आरोहति चपलता तस्य नृपस्य पताका शशि किरणां चुम्बनाय मेघानां आकुलता, हेमन्तस्य शिथिलता, प्रेमी युगलानां आलिङ्गने आधिक्यतामानयति । शिशिरस्य रजन्यां शीताधिक्ये चन्द्रकिरणे दहकमानं प्रेमी जनानां कक्षाणां गवाक्षानां मुद्रणं उष्ण वस्त्रेषु च उष्णतायाः अनुभवः इत्यादयः प्रसङ्गाः दर्शनीयाः सन्ति । शब्द विन्यासः भाषाप्रवाहः सर्वत्र सरलतापूर्वकः दृश्यते ।

3. मेघदूतम् :—

मेघदूत नामानुसारेण इयं रचना मेघदूतमिति भवति रचिता अस्ति । इयं रचना पूर्व मेघः उत्तर मेघः इति द्वयोः भागयोः माध्यमेन संकलिता अस्ति । कुबेरस्य शापेन अलकापुरितः निष्कासितः यक्षः हिमालयात् दूरे नीलगिरिः आश्रमे वसति । आषाढ मासस्य प्रथमे दिने यदा सागरात् मेघः उद्गच्छति हिमालयं प्रति च अभिमुखो

भवति । तदा यक्षः तं मेघं दूतमिति गत्वा अलकापुर्यां स्थितां स्वपत्नीं सन्देशं प्रेषयति । तत्र गन्तुं च तं मेघं मार्गमपि दर्शयति । दक्षिणभारतात् आगत्य मेघः हरिद्वारं प्राप्य गङ्गां दृष्ट्वा कनखलस्य मार्गेण हिमालयं प्रति आगमिष्यति । वियोगे तस्य पत्नी कीदृशी कष्टेन कालयापनं करोति इति मधुर भाषाया वर्णितमस्ति ।

उत्तरमेघे मानवस्य उदात्त प्रेम्णः भावना कुशलतया निगदिता अस्ति । यथा निर्जीवमपि पुष्पाः शब्दं निगदन्ति तौ प्रति स्वकीयं सन्देशं इति गमयति (प्रेषयति) । कालिदासः रससिद्ध कविः अतः अचेतनं मेघं चेतनस्य आरोपद्वारा मनुष्यकार्यस्य निर्माणमकरोत् । अस्य सर्वाणि पद्यानि मनोहराणि मधुराणि च सन्ति । तस्य शब्द चातुर्यमवलोकनीय एतद् प्रतीयते मेघ द्वारा प्रेषितस्य सन्देशं स्वीकृतं आसीत् । मेघ अनुसरणं कृत्वा परवर्तिनं अनेके काव्यकाराः दूतकाव्यानि रचनानि कृतवन्तः ।

अभिज्ञानशाकुन्तलम् :-

नाटकेषु कालिदासस्य प्रसिद्धं विशेष रूपेण अभिज्ञानशाकुन्तले किं निर्भरं अस्ति या नाटकं कालिदासस्य दर्शनीया अस्ति सा अभिज्ञानशाकुन्तलं मुख्य रूपेण मिलति अन्य नाटकस्य सम्बन्धे आलोचकानामिदं कथनं प्रसिद्धमस्ति —

काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला
तत्रापि चतुर्थोऽङ्कः तत्र श्लोक चतुष्टयम् ।

सप्तसु अङ्केषु रचिते अस्मिन् नाटके हस्तिनापु

नृपदुष्यन्तस्य, विश्वामित्रस्य पुत्र्याः शकुन्तलायाः च
प्रेम प्रतिरूपयन्ति । नृपः दुष्यन्तः आखेटस्य व्याजेन
कण्वाश्रमे प्रविशति। शकुन्तलायाः रूपेण सम्मोहितो
भूत्वा तया सह गान्धर्व विवाहं करोति शकुन्तलया सह
प्रतिज्ञां कृत्वा नगरीं गत्वा दुर्वासा शापेन तां विस्मरति
वियोगे शकुन्तला अहर्निशं तपति पितुरादेशेन
शकुन्तला दुष्यन्तस्य सभायां गच्छति। परन्तु तत्र
गत्वापि दुष्यन्तः तां न स्वीकरोति यदा मुद्रिकायाः
दर्शनेन शापस्य समाप्तिः भवति तदा दुष्यन्तोऽपि
शकुन्तलां स्मरति । वियोगज्वालायां द्वयोः दशा
चिन्तिता भवति. बालनायकस्य प्रेम्णः समाप्तिः
भवति । पवित्रस्य स्नेहस्य उत्पत्तिः भवति, अन्ततः
~~मारीचस्य आश्रमे~~ मारीचस्य आश्रमे द्वयोः भवति पुनर्मिलनं । अत्र च
शकुन्तला दुष्यन्तः शृङ्गार-रसेन पूरितोऽस्मिन्
महाकाव्ये नाटके च अन्येषां शृङ्गारस्य दृश्यं तादृशी नास्ति
तादृशी वियोगजन्यः वर्तते । काव्यस्य अनेके आदर्शाः
मानवजीवनस्य अनुभूतिं (पुत्रीं) प्रति पितुः स्नेहं
कन्यायाः विवाहः, नारीणां शिक्षितं तथा च आदर्शमयस्य
आदर्शिता, परिवारे पत्न्याः स्थानं परिवारस्य अन्य
जनान् प्रति तस्याः कीदृशः कर्तव्यः केन सह तस्याः
व्यवहारः कीदृशः भवेत् इदं सर्वं अस्मिन् नाटके उपदेश
रूपेण लभ्यते । नाटककौशलं दृष्ट्वा ज्ञानं दृष्ट्वा च
इदं नाटकं नाम्ना सह साफल्यमेव प्राप्नोति

भवति । तदा सः तं मेघं दूतमिति मत्वा अलकापुरीस्थितां स्वपत्नीं सन्देशं प्रेषयति । तत्र गन्तुं च तस्मै मेघाय मार्गम् दर्शयति । दक्षिणभारतात् आगम्य मेघः हरिद्वारं प्राप्य गङ्गां दृष्ट्वा कनखलस्य मार्गेण हिमालयं प्रति आगमिष्यति । वियोगे तस्य पत्नी कीदृशी अवस्थायां कालयापनं करोति इति मधुर भाषया वर्णितमस्ति ।

उत्तरमेघे मानवस्य ~~[illegible]~~ उदात्त प्रकारस्य भावनायाः कुशलतया चित्रितम् अस्ति । यथा निरर्थकमपि [illegible] शब्दं [illegible] तौ प्रति स्वकीयं सन्देशं इति गमयति । कालिदासः रसा-कविः अतः अचेतने मेघे चेतनस्य आरोपद्वारा मञ्जुल काव्यस्य निर्माणमकरोत् । अस्य सर्वाणि पद्यानि मनोहराणि मधुराणि च सन्ति । तस्य शब्द चातुर्यमवलोक्य एतद् प्रतीयते मेघ द्वारा यक्षस्य सन्देशः स्वीकृतः आसीत् । मेघ अनुसरणं कृत्वा परवर्तिनः अनेके काव्यकाराः इत कल्पना रचना कृतवन्तः ।

अभिज्ञानशाकुन्तलम् :-

नाटकेषु कालिदासस्य प्रसिद्धिः विशेष रूपे अभिज्ञान शाकुन्तले ! निर्भरा अस्ति या नाट्य कला कालिदासस्य दर्शनीया अस्ति सा अभिज्ञानशाकुन्तले एव मुख्य रूपेण मिलति अन्य नाटकस्य [illegible] आलोचकानामपि कथनं प्रसिद्धम् अस्ति —

काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला

तस्यापि चतुर्थोऽङ्कः तत्र श्लोक चतुष्टयम् ।

सप्तेषु अङ्केषु रचिते अस्मिन् नाटके हस्तिनापुर

नृपदुष्यन्तस्य, विश्वामित्रस्य पुत्र्याः शकुन्तलायाः च
प्रेम प्रसङ्गोऽस्ति । नृपः दुष्यन्तः आखेटस्य व्याजेन
कण्वाश्रमे प्रविशति । शकुन्तलायाः रूपेण सम्मोहितो
भूत्वा तया सह गान्धर्व विवाहं करोति शकुन्तलया सह
प्रतिज्ञां कृत्वा नगरीं गत्वा दुर्वासा शापेन तां विस्मरति
वियोगे शकुन्तला अहर्निशं तपति पितुरादेशेन
शकुन्तला दुष्यन्तस्य सभायां गच्छति । परन्तु तत्र
गत्वापि दुष्यन्तः तां न स्वीकरोति यदा मुद्रिकायाः
दर्शनेन शापस्य निवृत्तिः भवति तदा दुष्यन्तोऽपि
शकुन्तलां स्मरति । वियोगज्वालायां द्वयोः दशा
चिन्तनीया भवति . वासनात्मकस्य प्रेम्णः समाप्तिः
भवति । पवित्रस्य स्नेहस्य उत्पत्तिः भवति, अन्ततः
~~मारीच ऋषेः~~ मारीचर्षेः आश्रमे द्वयोः भवति पुनर्मिलनं । अस्मिन्
नाटकस्य अन्तेऽपि शृङ्गार-रसेन प्रवहति अस्मिन्
महाकाव्ये नाटके संयोग शृङ्गारस्य दृश्यं तादृशी नास्ति
यादृशी वियोगजन्यः वर्तते । काव्यस्य अनेके आदर्शाः
मानवजीवनस्य अनुभूतिं पुष्टिं प्रति पितुः स्नेहं
सखीनां विनोदः, वनस्पतीनां विकासः, तथा च आदर्श गृहस्थ
आदर्शिता, परिवारे पत्न्याः स्थानं परिवारस्य अन्य
जनान् प्रति तस्याः कीदृशः कर्तव्यः, केन सह तस्याः
व्यवहारः कीदृशः भवेत् इदं सर्वं अस्मिन् नाटके उपदेश
रूपेण लभ्यते । नाटककौशलदृष्ट्या रसदृष्ट्या च
इदं नाटकं काव्यकलया सह साफल्यमेव प्राप्नोति

5. मालविकाग्निमित्रम् :

कालिदासस्य त्रिषु नाटकेषु प्रथममस्ति रूपकम्। कथ्यते यत् कालिदासेन नाटक रचना-परम्परायाः नाट्यप्रयोगेभ्यो वा नाटकस्य रचना कृता आसीत्। पञ्चसु अङ्केषु विभक्ते अस्मिन् नाटके शुङ्गवंशीयस्य अग्निमित्रस्य तथा च मालविकायाः प्रेम्णः मनोहरम् चित्रणमस्ति। पुराणेषु वर्णितमस्य कथानकमादाय कविद्वारा कल्पनामिश्रणेन अस्य नाटकस्य रचना कृता आसीत्। श्रृङ्गार रसस्य उदाहरणभूतमिदं नाटकं नृपाणाम् अन्तः पुरस्य महिषीणां परस्परमीर्ष्या नृपस्य कामुकता तथा च कतिपयानां राजपत्नीनां धीरता उदारता उदात्तता इत्यादयः भावाः नाटकेऽस्मिन् चित्रिताः सन्ति। यद्यपि कविना नाट्यनियमानामस्मिन् नाटके यथा सम्भवं पालनं प्राप्तमस्ति तथापि यत् स्थानं वर्तते शाकुन्तलस्य न तत्स्थानं अस्य नाटकस्य।

6. विक्रमोर्वशीयम् :

अस्य नाटकस्य कथानकं सर्वप्रथमं ऋग्वेदे तत्पश्चात् शतपथ ब्राह्मणे उपलभ्यते। अत्र पुरुरवसः तथा च उर्वश्याः प्रेम प्रसङ्गः कमनीयया दृष्ट्या चित्रितमस्ति। अनेन प्राचीनेन प्रेम प्रसङ्गेन कालिदासस्य ध्यानं स्वं प्रति आकृष्टम्। अस्मिन् आख्याने प्रेम्णः अङ्कुरः पूर्वमेवासीत् कविकल्पना द्वारा सः अङ्कुरः पल्लवितः पुष्पितश्च जातः।

पुरूरवः उच्चकोट्याः उपकार प्रायेण नृपोऽस्ति। शत्रूणां हन्तारः अयमुर्वश्याः उद्धारं करोति। तेन उपकारेण उर्वशी तं प्रति अत्यधिकं मोहिता सञ्जाता। स यद्यपि पुरूरवसः अलौकिके सौन्दर्ये आसक्ता अस्ति तथापि अनेक समयानां मध्यमेन सा तस्य पत्नीत्वं स्वीकारं करोति। वियोगावस्थायां पुरूरवः उन्मत्तवत् वने-2 भ्रमति अतः शृङ्गार रसस्य द्वयोः रूपयोः प्रतिपादनमस्मिन् नाटके सम्यक् तयैव सञ्जातम्।

प्र० 6 अश्वघोषस्य जीवन परिचयं दत्त्वा तद् रचितानां काव्यानां परिचयः देयः ?

उत्तरम् :- संस्कृत साहित्ये अश्वघोषस्य सम्बन्धे इयमाशङ्का अस्ति यत् अश्वघोषः कालिदासस्य पूर्ववर्ती अथवा परवर्ती, परन्तु अधुना आलोचकानामन्वेषणस्य सारांशेण यत् मतं स्वीक्रियते तदनुसार कालिदासस्य अश्वघोषस्य पूर्ववर्ती अस्ति। अश्वघोषः कोऽपि कोऽपि अस्ति अस्य स्थानस्य कालस्य च सम्बन्धे आलोचकेषु पूर्णतया मतैक्यं नास्ति भारतस्येतिहासे हर्षवर्धनस्य कार्यकालः सप्तमशताब्दी अस्ति हर्षद्वारा रचितेषु नाटकेषु अश्वघोषस्य परिचयोऽस्ति अनेन कारणेन इदं सिध्यति यत् अश्वघोषः तस्मात् नृपात् सर्वथा पूर्ववर्ती अस्ति। अश्वघोषस्य कार्यकालः निर्विवाद रूपेण प्रथमशताब्दी एव स्वीक्रियते। अस्य सम्बन्धे हैमेशचन्द्र चट्टोपाध्यायस्य कथनमस्ति यत्

निर्धारणम्

निर्विवाद रूपेण अश्वघोषः कालिदासस्य परवर्ती आसीत्। अनेन कारणेन ईशवी प्रथम शताब्दी एव अस्य कार्यकालः निर्धारयितुं शक्यते। अयं कविः अयोध्या वासी आसीत् अस्य मातुः नाम सुवर्णाक्षी इति मिलति। अस्य सम्बन्धे इदं प्रचलितमस्ति यत् अयं जीवनस्य प्रारम्भे ब्राह्मण आसीत् तदनन्तरं च बौद्ध धर्मस्य दीक्षा द्वारा अयं बौद्धः सञ्जातः। अस्य साहित्ये वैदिक धर्मस्य ब्राह्मणधर्मस्य च कुत्रापि निन्दा न मिलति अनेक स्थलेषु बौद्ध धर्म प्रति अपि अस्य सम्मान भावः दृश्यते एव।

कृतयः (रचना) :-

अस्य नाम्नः सप्त कृतयः उपलब्धाः सन्ति यथा (1) गण्डिस्तोत्रगाथा (2) सूत्रालंकारः (3) बुद्धचरितम् 4 सौन्दरनन्दम् (5) शारीपुत्रप्रकरणम् (6) वज्रसूची 7 महायान श्रद्धोत्पादः।

एतासु रचनासु तिस्रः एव रचना प्रचलिता प्रसिद्धाः च सन्ति। (1) बुद्धचरितं (2) सौन्दरनन्दं (3) शारीपुत्रप्रकरणम्

(1) बुद्धचरितम् :-

बुद्धचरितं महाकाव्यमेव वस्तुतः अश्वघोषस्य कीर्ति स्तम्भोऽस्ति। चीनी भाषायां तिब्बतीय (तिब्बत) भाषायामस्य महाकाव्यस्य अष्टविंशति सर्गाः उपलब्धाः सन्ति। परन्तु संस्कृते यत् बुद्धचरितमुपलभ्यते तस्मिन् ~~सप्तदश~~ चतुर्दश एव सर्गाः सन्ति। कथानक रूपेण गौतम बुद्धस्य जन्म कालादारभ्य तस्य निर्वाण पर्यन्तः।

तथा च मोक्षोपदेशः पर्यन्तमेव मिलति। परन्तु इदं न
केवलं धर्म कथा तथा च केवलं श्रद्धापूर्वक भक्तिः अपितु
शुभागमनमपि अस्ति। निपुण कवि द्वारा प्रकल्पितोऽस्ति अस्मिन महाकाव्ये
अस्मिन भाषायाः सरलप्रवाहः, उदात्त गुणानाम् च निदर्शनं
तु अस्ति परन्तु मानवस्य सूक्ष्म भावाना तथा च जटिल
विचाराणां दिग्दर्शनमपि मिलति यत्र कुत्र बुद्ध धर्मस्य
दार्शनिक विचाराणामुल्लेखन (अस्य ग्रन्थस्य काव्य रूपे)
काव्ये क्वाचित् शिथिलता क्वाचित् च जटिलता दृश्यते
तथापि कवि द्वारा सफलता पूर्वकमस्य रचना कृता अस्ति,
अस्मिन् महाकाव्ये अन्तःपुरविहार उपवनभ्रमणं
बुद्ध दर्शनं रुग्ण दर्शनं, मृतक दर्शनं कामना द्वारा
मनोरञ्जनार्थं ग्रामदर्शनं इत्यादयः प्रसङ्गाः सफलता
निर्वाहिताः सन्ति। अस्मिन् काव्ये अन्ये ते सर्वे गुणाः
उपलभ्यन्ते ये वा महाकाव्ये अपेक्षा भवति।

2 सौन्दरनन्दम् :-

अस्य महाकाव्यस्य रचना आचार्य —
अश्वघोषपादस्य! अष्टादश-सर्गेषु इति विभक्तोऽस्ति।
कथानक रूपे इदं महाकाव्यं नन्दस्य तथा च
सुन्दर्याः यौवन सुलभस्य, उद्दामकामस्य भव्यभावायाँ
चित्रणमस्ति। बुद्ध चरितस्य अपेक्षया अस्मिन्
महाकाव्ये सुलभता, सरलता, स्निग्धता, सुन्दरता च
दृश्यते। अस्मिन् नन्दस्य सुन्दर्याः च प्रेम-
प्रसङ्गाः सन्ति। तत्पश्चात् च तदा नन्दः गृहत्यागं

वि १२।

करोति यदा सः सुन्दर्याः प्रेम्णा तथा च विलासे आकण्ठमग्नोऽस्ति कुत्र: नन्दस्य जीवनस्य उद्धाराय तथाच मङ्गलकामनाया नन्दं प्रव्रज्या (संन्यास) धारणाय ~~विवशं~~ करोति । यद्यपि नन्दः प्रथमन्तु सुखमयं गृहस्थ जीवनं त्यक्तुं तत्परो नाभवत् परन्तु

अन्ततः ~~अनन्तः~~ सुगतस्य कथनेन बौद्धधर्मस्य च प्रभावेन सः बौद्धधर्मे दीक्षितो जातः । अस्मिन् महाकाव्ये अश्वघोषेन पदे-पदे स्वकाव्यकौशलस्य परिचयः दत्तः प्रसाद गुणेन अस्य काव्यं सर्वथा परिपूर्णमस्ति । भाषायाः कोमलता सरसता तथा च मानव मनसः द्विविधात्मको स्थितिः अत्र दर्शनीया अस्ति - यथा

तं गौरवं बुद्धगतं चकर्ष
भार्यानुरागः पुनराचकर्ष ।
सोऽनिश्चयान्नापि ययौ न तस्थौ
तरंस्तरंगेषु इव राजहंसः ॥

अतः इदं महाकाव्यमपि संस्कृत काव्यस्य शोभामेव वर्धयति ।

प्र07 उपमा कालिदासस्य --- ?

उत्तर- (भूमिका) कालिदासस्य काव्यमनेकानेकैः विशेषताभिः सर्वथा परिपूर्णमस्ति । कालिदासस्य संस्कृत साहित्ये यथा भाव सौन्दर्यं अद्वितीयमस्ति तथा च भाषा सौन्दर्यस्य अपि तस्य सफलता प्रतिपदं मिलति एवं रस गुणानां भावानाञ्च चमत्कार द्वारा यथा भावाः अलंकृताः भवन्ति तथा भाषा अलंकाराणां निपुण प्रयोगेन एव शोभते ।

प- अलंकाराणां यदि ~~[illegible]~~ कविः बाहुल्येन समर्थकः
[illegible]

वि १२

करोति यदा सः सुन्दर्याः प्रेम्णा तथा च विलासे आसक्तं मग्नोऽस्ति बुद्धः नन्दस्य जीवनस्य उद्धाराय तथा च मङ्गलकामनायै नन्दं प्रव्रज्या (सन्यास) धारणाय करोति। यद्यपि नन्दः प्रथमन्तु सुखमयं गृहस्थ जीवनं त्यक्तुं तत्परो नाभवत् परन्तु

अन्ततः बुद्धस्य कथनेन बौद्धधर्मस्य च प्रभावेन सः बौद्धधर्मे दीक्षितो जातः। अस्मिन् महाकाव्ये अश्वघोषेन पदे-2 काव्यकौशलस्य परिचयः दत्तः प्रसाद गुणेन काव्ये कला सर्वत्र परिपूर्णमस्ति। भाषायाः कोमलता स्निग्धता तथा च मानव मनसः द्विविधात्मकी स्थितिः अत्र दर्शनीया अस्ति - यथा

तं गौरवं बुद्धगतं चकर्ष
भार्यानुरागः पुनराचकर्ष।
सोऽनिश्चयान्नापि ययौ न तस्थौ
तरंस्तरंगेषु इव राजहंसः॥

अतः इदं महाकाव्यमपि संस्कृत काव्यस्य शोभामेव वर्धयति।

प्र07 उपमा कालिदासस्य --- ?

उत्तर- भूमिका 1. कालिदासस्य काव्यमनेकाभिः विशेषताभिः सर्वथा परिपूर्णमस्ति 2. कालिदासस्य समान साहित्ये यथा भाव सौन्दर्यम् अद्वितीयमस्ति तथा च भाषा सौन्दर्यमपि तस्य सफलता प्रतिपदं मिलति एवं रीति गुणानां भावानाम् च चमत्कार द्वारा यथा भावाः अलंकृताः भवन्ति तथा भाषा अलंकाराणां सफल प्रयोगेण एव शोभते।

प. अलंकाराणां यदि कविः बाहुल्येन समर्थकः कारयेत्

अस्ति तदा तस्य कविता अलंकारस्य भारेण मृतप्राया भवति । परन्तु कालिदास सम्बन्धे इदं सत्यमस्ति यत् कालिदासः अलंकाराणामनुसरणं न करोति अपितु अलंकाराः एव कालिदासमनुगच्छन्ति । शब्दालंकाराः कालिदासस्य प्रियाः तु सन्त्येव परन्तु अर्थालंकारेषु तस्य गतिः सर्वथा दर्शनीया अस्ति । तेषु अर्थालंकारेष्वपि उपमा नामकः अलंकारः कालिदासस्य प्रियतमः अलंकारः अस्ति । उपमेयस्य उपमानेन सह तुलना एव उपमा-नामकः अलंकारोऽस्ति । कालिदासः स्वग्रन्थेषु पूर्णोपमा नामकस्य एव अलंकारस्य आधिक्येन प्रयोगमकरोत् तस्य कामपि रचनां वयं पश्यामः सर्वत्र उपमालंकारस्य गङ्गा बाध्य मत्या सततं प्रवहति । रघुवंशस्य प्रथमः श्लोकः अत्र दर्शनीयः अस्ति ।

१२४

(1) वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥ भणिता अस्ति

अत्र पार्वत्याः शिवस्य च सम्पृक्तता (दानीकृता) शब्दार्थयोः सम्पृक्ततावत् कालिदासेन मानितमस्ति यथा शब्दं बिना अर्थस्य अर्थं बिना शब्दस्य न किमपि महत्त्वं तथा शक्तिं बिना शिवः, शिवं बिना च शक्तिः कथमपि सम्भवा नास्ति ।

2 अन्यत्र आदिमेन महाकाव्ये द्वितीयमुदाहरणं दर्शनीयमस्ति —

क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः ।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् ॥

~~संचारिणी दीपशिखेव रात्रौ यं यं व्यतीयाय पतिंवरा सा~~
नरेन्द्रमार्गाट्ट इव प्रपेदे विवर्णभावं स स भूमिपालः

अतः कालिदासस्योपमा अस्ति दर्शनीया। यथा उडुप्रकारा गम्भीरे सागरे ~~तरीतुं~~ ~~अतीव~~ तरितुमति कठिनमस्ति तथैव निजमतिमन्दा — बुद्धिद्वारा महतः सूर्यवंशस्य वर्णनमपि निश्चयं नास्ति।

3 शाकुन्तले नृपः दुष्यन्तः अनुपमां सौन्दर्यसम्पन्नां शकुन्तलां दृष्ट्वा तस्याः सुन्दरतां अनेन प्रकारेण वर्णयति :-

अधरः किसलयरागः कोमलविटपानुकारिणौ बाहू।
कुसुममिव लोभनीयं यौवनमङ्गेषु सन्नद्धम्॥

अत्रापि एतेन किसलयेन सह अधरस्य रागः तथा च विटपवत् तस्याः बाहू। ~~इयम्~~ अत्रापि उपमास्ति अवलोकनीया।

इन्दुमत्याः स्वयंवरे इन्दुमती जयमालामादाय स्वयंवरे उपविष्टानां नृपाणां अग्रतः चलति तत्रापि कालिदासस्योपमा अस्ति श्लाघनीया।

सञ्चारिणी दीपशिखेव रात्रौ
यं यं व्यतीयाय पतिंवरा सा —

नरेन्द्र मार्गाट्ट इव प्रपेदे विवर्णभावं स स भूमिपालः

अत्रापि उपमाद्वारा इदं दर्शितमस्ति यत् इन्दुमती पुष्पमालया सह एकस्य नृपस्य समीपं गच्छति तं तत्रैव त्यक्त्वा सा अग्रे गच्छति त्यक्तः नृपः निराशो भवति तस्य निराशा आकारः ~~कस्मात्~~ सम्यक् साचिवत् तथा च इन्दुमती ~~मुख~~ दीपवत्। इन्दुमत्याः गृहीता माला दीपज्वालावत् वर्णयति। अनेन प्रकारेण ~~अन्ये च~~ अन्यत्रापि कालिदासस्योपमा दर्शनीयामस्ति। एतत् निदर्शनं उदाहरणमात्रम्।

गृहीता

तदुपसंहरति

~~अधरः किसलयरागः कोमलविटपानुकारिणौ बाहू~~

कुसुममिव लोभनीयं यौवनमङ्गेषु सन्नद्धम् ॥ 14

प्र०१ भारवेः जीवन परिचयं प्रदश्य तत् साहित्यं प्रति अपि विचारः कार्यः ?

उत्तरम् – संस्कृत साहित्ये महाकाव्यकारेषु भारवेः स्थानमपि महत्त्वपूर्णमस्ति । भारविः किरातार्जुनीय नामायाः रचयिता अस्ति । भारविकालात् संस्कृत काव्यकाराणां मध्ये पाण्डित्यप्रदर्शनं, वाक्चातुर्यप्रदर्शनम् अलंकाराणां चमत्कारस्य च अवलम्बनं एतद् सर्वं काव्यकाराणामुद्देश्य जातम् । अस्य मार्गस्य मार्गी सर्वप्रथमः भारविः अस्ति । संस्कृतस्य अन्य कविवत् भारवेः समयः जीवनस्य जन्मस्थानस्य च सम्बन्धे स्पष्ट रूपेण किञ्चिदपि न मिलति । तस्य काव्ये कालिदासस्य प्रभावः, तस्य काव्यस्य च माघ काव्ये प्रभावः स्पष्ट रूपेण दृश्यते अनेन इदं कथयितुं शक्यते यत् निश्चित रूपेण कालिदासस्य परवर्ती तथा च माघस्य पूर्ववर्ती आसीत् । एहोलस्य स्थाने एकः शिलालेखः अमिलत् तस्य कालः सप्तम शताब्द्या (634) मध्यः अस्ति । तस्मिन् शिलालेखे नृप पुलकेशिनः द्वितीयस्य प्रशस्त्यां भारवेः नाम उल्लिखितम् अस्ति । अवन्ति सुन्दरी कथा इति ग्रन्थस्याधारेण भारविः दण्डिनः प्रपितामहः आसीत् तथा च विष्णुवर्धनस्य सभा पण्डितः आसीत् । अतः एतेषां प्रमाणानामाधारेण भारवेः कालः षष्ठ शताब्द्याः अन्तः सप्तमस्य च प्रारम्भः इति स्वीक्रियते विद्वांसः ।

सारांश

गृहीतमस्ति ।

कथा :-

भारवेः एका रचना उपलब्धा भवति तदस्ति किरातार्जुनीयं महाकाव्यम् । इदं महाकाव्यं महाकाव्यस्य शास्त्रीय परिभाषाया लक्षितमस्ति । अनेन महाकाव्येन स्वगुणानां कारणेन संस्कृत महाकाव्यानां बृहत्त्रय्यां विशिष्टं स्थानं निर्धारितं कृतमस्ति । अस्य कथानकं महाभारतस्य वनपर्वतः गृहीतमस्ति । वने पाण्डवाः वनवासस्य जीवनं यापयन्ति । दुर्योधनस्य शासनस्य परिस्थितिं ज्ञातुं पाण्डवाः एकं चरं तत्र प्रेषयन्ति । दूतः आगत्य दुर्योधनस्य शासनव्यवस्थायाः प्रशंसां करोति । द्रौपदी तथा च भीमः शत्रुं प्रति युद्धस्य समर्थनं कुर्वतः । युधिष्ठिरः तौ धैर्यधारणाय समयस्य प्रतीक्षा करणाय च कथयति । सहसा तत्र व्यासस्य आगमनं भवति । अर्जुनः च इन्द्रं प्रसाद्य दिव्यास्त्राणि प्राप्तुं परामर्शति । एवं प्रकारेण अस्य कथानकं अष्टादश सर्गेषु विभाजितमस्ति । ऋतूनां पर्वतानां 3 सूर्यास्तस्य 4 चन्द्रोदयस्य 5 जलक्रीडा 6 क्षेत्राणां वर्णनानि इत्यादीनि अस्य काव्यस्य स्वाः विशेषताः सन्ति ।

अर्थगौरवम् :-

अस्मिन् महाकाव्ये अर्थगौरवस्य प्राधान्यमस्ति । सीमित शब्दानां माध्यमेन विपुलार्थस्य अभिव्यक्तिः अस्य ग्रन्थस्य विशेषता अस्ति । अर्थान्तरन्यासस्य माध्यमेन कविद्वारा स्थाने-स्थाने अर्थगौरवस्य प्रदर्शनं कृतमस्ति । अर्थस्य गौरवं अस्य ग्रन्थस्य आरम्भात

अन्तः पर्यन्तं पदे-२ (अर्थगौरवं) दृश्यते ।
भारविकाले पाण्डित्यप्रदर्शनस्य कालोऽऽसीत् । अस्य श्रीगणेशोऽपि
भारविद्वारा एव कृतोऽस्ति । भारविना स्व काव्ये
अनेक स्थलेषु स्व प्रकाण्ड पाण्डित्यस्य प्रदर्शनं कृतमस्ति
सम्भवतः इदं पाण्डित्यं प्रदर्शनं तस्य युगस्यावश्यकता
आसीत् । भारविना सा एव आवश्यकता परिपूर्णा
कृता । तस्य पाण्डित्यस्य प्रदर्शनस्य त्रयः आधाराः
सन्ति । १ व्याकरण ज्ञानं, २ छन्द रचना ३ अर्थ वैचित्र्यम् ।
अर्थस्य विचित्रता तु एतादृशी अस्ति यत् एकस्य
श्लोकस्य द्वौ, त्रयः अथवा चत्वारः अपि अर्थाः
भवितुं शक्नुवन्ति । स्व पाण्डित्यप्रदर्शनकालेन
कारणेन अपि ~~[illegible]~~ [illegible] यत् भारविना एकस्य एव अक्षरस्य
(नकारस्य) माध्यमेन एव सफलता पूर्वकं श्लोक-
रचना कृतोऽस्ति । सीमित शब्दानां माध्यमेन
अनन्त भावानां अभिव्यक्तिः गागर सागरवत् अस्ति ।
पदे-२ अर्थान्तरन्यासस्य उदाहरणानि दृश्यन्ते यानि सन्ति
यथा (१) हितं मनोहारि च दुर्लभं वचः" अर्थात्
(मनोहारि हितकरञ्च वचः दुर्लभं भवति)
(२) सुदुर्लभाः सर्वमनोरमा [illegible] गिरः ।
(३) गुरुतां नयन्ति हि गुणा न संहतिः ॥
4 गुणाः प्रियत्वेऽधिकृता न संस्तवः ।
5 वरं विरोधोऽपि समं महात्मभिः ॥
6 न वञ्चनीयाः प्रभवोऽनुजीविभिः ।
7 ~~वसन्ति~~ हि प्रेम्णि गुणा न वस्तुनि ॥
वसन्ति
8. नास्ति [illegible]

1 सन्धायन्न खलु तेजसा जगन्न महानिच्छति भूति मन्यत: ।

प्रकृतिः खलु सा महीभृतः सहते नान्यसमुन्नतिं यया ।

(3) प्रकर्षतन्त्रा हि रणे जयश्रीः ।

(2) भवन्ति मामासु सखान दन्तिनः ।

(4) न तितिक्षा सममस्ति साधनम् ।

(5) सतां हि वाणी गुणमेव भाषते ।

निम्नलिखितेन द्वितीयसर्गस्य स्वेन लिखितेन श्लोकेन स्वरूप नृपस्य जीवनं सर्वथा परिवर्तितं कृतमासीत् ।

सहसा विदधीत न क्रियामविवेकः परम पदां पदम् ।
वृणते हि विमृश्य कारिणं गुणलुब्धाः स्वयमेव सम्पदः ॥

प्रथम सर्गे उपमुखितस्य निर्वत्र प्रचलिता आसीत्

कुर्वन्ति ते मूढधियः पारम्यं दासनं
भवन्ति भयावृत्तयो न भावनं ।

निम्नलिखितेन एतानि पूर्वोक्तानि सर्वाणि उदाहरणानि भारवेरर्थगौरवस्यैव समर्थकानि सन्ति ।

प्र०4. माघस्य परिचयः पूर्वकं तस्य काव्य परिचयः संक्षेपेण देयः ।

उत्तरम् :- भारते प्रचलित संस्कृत महाकाव्यकारेषु माघस्य स्थानमस्ति । माघेन स्वकीये महाकाव्ये शिशुपालवधे स्वस्य संक्षिप्तः परिचयः दत्तः । तदनुसारेण तस्य पिता दत्तक सर्वाश्रयः तथा च पितामहः सुप्रभदेवः आसीत् । अयं कदाचित् गुर्जर नरेशस्य राज्ञो आसीत् । आचार्य वामनः तथा च आनन्दवर्धनः स्वकीययोः लक्षण ग्रन्थयोः

माघस्य कतिपयानां श्लोकानामुदाहरणं रूपेण उल्लेखः कृतोऽस्ति । आनन्दवर्धनाचार्ययोः स्थितिकालः नव शताब्द्याः पूर्वार्द्धम् (अन्तिमे) अस्ति । अतः तदनुसारेण माघस्य कालः अष्टमशताब्द्याः समाप्तिः एव अस्ति । (8) राष्ट्रकूटस्य नृप-तुङ्गः कन्नड़भाषायाः ग्रन्थे कविराजमार्गे माघं कालिदासस्य तुल्यं स्वीकृतवान् । अनेन इदं स्पष्टं भवति यत् नवशताब्द्याः प्रारम्भे माघस्य साहित्ये गौरवमासीत् । स्यात् माघेन शिशुपालवधस्य द्वितीय सर्गे काशिकावृत्तिः तथा च न्यासः अनयोः द्वयोः व्याकरण ग्रन्थयोः उल्लेखः कृतोऽस्ति । काशिका वृत्तेः रचना कालः सप्तम शताब्द्याः मध्यः स्वीकृत अस्ति । हर्षचरिते अपि न्यासस्य उल्लेखः अस्ति । अनेन माघस्य समयः सप्तम-शताब्द्याः उत्तरार्द्धः एव भवितुं शक्यते ।

कृतिः :-

शिशुपालवधमस्य एकमात्रा रचना अस्ति ।

2 विंशति सर्गेषु विभाजितस्य अस्य महाकाव्यस्य कथानकं 3
महाभारतात् संगृहीतमस्ति । मुख्य रूपेण कृष्णस्य शिशुपालस्य च युद्धं तथा च शिशुपालस्य च मृत्युः अस्य महाकाव्यस्य महत्वप्रदर्शनमस्ति । अत्र कवि द्वारा इदमपि प्रदर्शितमस्ति यत् कृष्णस्य शिशुपालस्य मात्रा सह ~~अयं~~ इदं ~~समयः~~ वचनं आसीत् यत् शतमपराध-पर्यन्तं कृष्णः शिशुपालस्य किमपि अनर्थं न करिष्यति । यदा संख्या शताधिका भविष्यति तदा शिशुपालस्य मृत्युः निश्चित एव । नारदः श्रीकृष्णमागत्य

शिशुपालस्य अत्याचाराणां वर्णनं करोति । तं हन्तुं च कृष्णमुत्साहयति । तस्मिन्नेव काले युधिष्ठिरस्य राजसूय निमन्त्रणमागच्छति । विचार विमर्शद्वारा कृष्णः युधिष्ठिरस्य राजसभायां गच्छति तत्र अर्घ्यदाना(य) विवादो भवति । शिशुपालं स्वकल्पना सर्वोपरि धारणा आसीत् यत् कृष्णं प्रति एव अर्घ्यं जलं भवेत्, अस्य विचारस्य शिशुपालः समर्थनं न करोति । अपशब्दानां (गालीनां) च माध्यमेन कृष्णस्य अपमानं करोति द्वयोर्मध्ये युद्धं भवति । तस्मिन् युद्धे कृष्णद्वारा शिशुपालः हन्यते । एतावत्या कथायां विंशति सर्गाः महाकाव्ये सन्ति । महाकाव्यस्य याः विशेषताः सन्ति तासां सर्वासां मुख्यरूपं वर्णं शिशुपाल वधे संग्रामहे । किरातार्जुनीयं महाकाव्यं शिशुपालवधस्य आदर्श काव्यम् । अनेक स्थलेषु द्वयोः काव्ययोः मध्ये समानता । अतः इदं ~~कुमारसम्भवं~~ शिशुपालवध कवि माघस्य काव्यकलायाः उदाहरणमस्ति ।

3 माघे सन्ति त्रयो गुणाः —

आलोचकानामिदं कथनं यत् शिशुपाल वधे उपमायाः अर्थगौरवस्य पदलालित्यस्य च त्रिवेणी (गंगा) प्रवहति । इदं तु निर्विवाद यत् आलोचकाः गद्य काव्ये कालिदासस्योपमा भारवेरर्थगौरवं तथा च दण्डिनः पदलालित्यमिति प्राप्नुवन्ति । एतेषां त्रयाणां गुणानां एकत्र मनव काव्ये सन्निवेशो माघस्य बहुमुखी प्रतिभा परिचायका भवति । माघस्य गुणाः संस्कृतस्य प्रमुख काव्याकारेषु क्रियते । तस्य चरित्रे कवित्वस्य

अभूतपूर्वं व्यावहारिक

पाण्डित्यस्य च अपूर्वं निदर्शनमस्ति । यत्र कालिदासे
कवित्वं भारवौ व्यावहारिकं राजनीति पटुत्वं तथा च
श्रीहर्षे दार्शनिक पाण्डित्यस्य पराकाष्ठा मिलति तत्र
माघः एकः जनतन्त्र-स्वतन्त्रः विद्वत्प्रमुख व्यक्तित्वं
ज्ञानं कृतवानस्ति । 1. व्याकरणे 2. राजनीतौ 3. सांख्ययोगे
4. बौद्ध दर्शने 5. पुराणशास्त्रे 6. अलंकारशास्त्रे संगीत 7.
विद्यायाम् 8. अश्वविद्यायां 9. हस्ति विद्यायां च तस्य
असामान्यः अधिकारः । 1. उपमा कालिदासस्य
उपमायां विशेषता अस्ति । उपमायाः सरसः तथा च
उचित प्रयोगः यत् कालिदासे मिलति तत् अन्यत्र
दुर्लभं एव तथापि सुन्दराणामुपमानां शिशुपाल
वधे अभावोऽपि नास्ति । उदाहरणम् उदयजलधर नील मुक्तालताऽऽ
अलंकृत कृष्णस्य वक्षः व्योमाकाश गङ्गावत्
दृश्यते । ~~हिम धवलवत् नारदस्योपमा सुमेरु पर्वतेन~~
~~... आसीत् विद्युत सम्मोहः शरदतौ मेघ तुल्यः~~
~~प्रतिभाति~~ श्वेत मेघः एव नारदः तथा च विद्युत
एव पीत लताः इत्यादिषु उपमायाः चमत्कारः दृश्यते एव ।
पीताम्बर धारणेन कृष्णस्य देहः वडवाग्निः युक्तः
समुद्रेण सदृशी अस्ति । एतद् विना अन्यापि
उपमा माघे तथा प्रयोगः एव । अन्तर केवलं
इदमस्ति यत् कालिदासस्योपमासु स्वाभाविकतास्ति
माघस्योपमासु पाण्डित्य प्रदर्शनम् ।
2. अर्थ गौरवम् – अर्थ गौरवं भारविना सह माघस्य
तुलना सहजा एव, राजनीति युक्तानां व्यवहार परिप्रश्नानां

नीति श्लोकानां या छटा भारवेः काव्ये मिलति, सा नो माघ काव्येऽपि नायं पश्यामः कतिपयेषु स्थलेषु माघः भारविमपि अतिक्रमति । अत्रापि अन्तरं ~~केवलमिदं~~ केवलमिदं यत् भारवेः भावेषु सरलता स्वाभाविकता अस्ति परन्तु माघ काव्ये पाण्डित्य प्रदर्शनस्यैव व्याकुलताम् श्रीकृष्णं प्रति बलभद्रस्य इदं कथनं यत् [illegible: आनयान्तत?] बलं शास्त्र सम्मत बले न कदापि एकस्मिन् स्थाने सम्भवे नो स्तः माघः कस्या विलक्षणस्य भाविकं चित्रणं प्रस्तुतं करोति । माघकाव्ये अर्थ पूर्णानां पदानां बाहुल्यं दृश्यते । मल्लिनाथस्यानुसारेण भारवेः काव्ये अर्थ गौरवस्य छटा नारिकेल फलवत् तत् फलं द्विधा कृत्वा सरलतया रसास्वादनं कर्तुं शक्यते ।

3. पदलालित्यम् :-

माघ काव्यस्य शब्दविधानम् अद्वितीयमस्ति । भाषायां शब्दानां च तस्य असामान्य अधिकारः तदा एव कथितम् कथितमस्ति । "नव सर्ग गते माघे नव शब्दो न विद्यते" माघ काव्ये पदलालित्यमस्ति दर्शनीयम् :-

~~मां मां प्रैक्षत कान्ता [illegible] द्विधा [illegible] ।~~
~~[illegible] समाहित [illegible] ॥~~

मधुरया मधुबोधितमाधवी - मधुसमृद्धिसमेधितमेधया ।
मधुकराङ्गनया मुहुरुन्मदध्वनिभृता निभृताक्षरमुज्जगे ॥

एतानि सन्ति बहूनि उदाहरणानि यत्र माघ काव्ये पदलालित्यस्य छटा विद्यमाना अस्ति । एतस्य सम्बन्धे

केनचित् लिखितमस्ति यत् माघे भारवेः पारंगतता (एवं) गाम्भीर्यं नास्ति तथापि तस्य व्यञ्जना प्रणाली अनुपमा कल्पना परिष्कृता अस्ति। [संस्कृत महाकाव्य परम्परायां द्वितीयः ~~[illegible] [illegible]~~ माघ एव। माघः अलंकृत शैल्याः कविः अस्ति, माघे उपमा, अर्थ गाम्भीर्यं तथा च पदलालित्यं एकत्र दृश्यते अतएव बुधाः इति कथनमुचितमस्ति। पूर्वकवीनां त्रयाणां गुणानां एकत्र सन्निवेशेन इयमुक्तिः सर्वथा चरितार्था अस्ति। माघे सन्ति त्रयो गुणाः)

समग्रकृति

अवलोक

प्रश्न8: श्रीहर्षस्य परिचयः तस्य काव्यस्य च संक्षिप्त परिचयः देयः।

~~उत्तरम्: माघस्य पश्चात् संस्कृत महाकाव्यकारेषु श्रीहर्षस्य एव स्थानं प्रधानीयमस्ति। द्वादशशताब्द्याः उत्तरार्धे श्रीहर्षेण नैषधीय चरितम् चरितमिति महाकाव्यस्य रचना कृता। माघ पश्चात् अन्य काव्यस्य प्रसिद्धिः एतावती न जाता। श्रीहर्षः कान्यकुब्ज नरेशस्य राजसभायां पण्डितः आसीत्। स्वयमेव तेन लिखितमस्ति यत् ताम्बूलद्वयम् आसनञ्च लभते यः कान्यकुब्जेश्वरात्। श्रीहर्षस्य समये कान्यकुब्जस्य राजा विजयचन्द्र अथवा जयचन्द्र आसीत्।~~

प्रश्न — सम्राजः हर्षस्य परिचयं दत्वा तल्लिखितानां नाटकानां परिचयं देयम्?

उत्तर — भारतीय इतिहासे हर्षवर्धनस्य नाम प्रसिद्धमस्ति। सः स्वयं साहित्यानुरागी कुशलशासकः तथा च साहित्यकारः आसीत्। अयं नृपः इतिहास प्रसिद्धः अस्ति। अतः अस्य जीवन सम्बन्धे इयं स्पष्टता अस्ति यत् तस्य राज्यकालः सप्तम शताब्द्याः प्रारम्भात् मध्य पर्यन्तमासीत्। हर्षस्य नाटकानां सम्बन्धे कतिपयानाम् आलोचकानामिदं कथनमस्ति यत् अयं नृपः यद्यपि प्रतिभावान् विद्वान् आसीत् परन्तु राज्ञः साम्राज्यस्य राजकार्येषु एतावत् व्यस्तः भवति यत् साहित्य रचनायै कदापि न समयः लभते। अतः यानि नाटकानि हर्षस्य नाम्ना सन्ति तेषां रचना बाण, धावकादयः कवीनां कृतं भवेत्। नृपेण च तेभ्यः कविभ्यः प्रचुर-मात्रायां धनमयच्छत् तथा च नृपेण स्वनाम्ना एतेषां नाटकानां प्रचारः प्रसारः कारितः भवेत्। किमपि स्यात्, त्रीणि नाटकानि हर्ष नाम्ना एव प्रसिद्धानि सन्ति। परन्तु इदमपि सम्भवमस्ति यत् विद्वान् नृपद्वारा एव एतेषां नाटकानां रचना अभवत्।

नाटकानि :-

हर्षस्य नाम्ना त्रीणि नाटकानि उपलभ्यन्ते यथा, १ प्रियदर्शिका, २ रत्नावली ३ नागानन्द एतेषु ग्रन्थेषु रत्नावली तथा च प्रियदर्शिका द्वे नाटके स्तः द्वयोः कथानके चत्वारः-२ अङ्काः सन्ति। द्वयोः कथावस्तूनि तथा च रूपरेखायां समानता अस्ति। द्वयोः नाटकयोः नायकः

उदयनः तथा च राजगृहेऽपि वासवदत्ता आसीत् ।

1 रत्नावली नाटके अङ्कायाः राजकुमारी (नागरिका) (रत्नावली) तस्य प्रेमिका आसीत् । पूर्वं उदयन सह तस्य प्रणयं तदनन्तरं च विवाहस्य प्रसङ्गोऽस्ति । अस्य आयोजनं मन्त्री यौगन्धरायणद्वारा कृतमासीत् । यदा जलपातः जलमग्नं भवति, रत्नावली रक्षणाय रक्षयामि उदयनस्य राजपुरे आगच्छति किञ्चित काले यावत् सा नायिका नत् कार्यं करोति । अन्ततः वासवदत्ताद्वारा रत्नावल्याः विवाहः उदयन सह भवति । परन्तु [illegible] वासवदत्ता सदृशः त्यागः अन्यत्र तुलभो नास्ति । पत्नी परन्तु सुखाय स्वजीवने सहपत्न्या आगमनं कथं सहते एतादृशं तु अन्यत्र कथञ्चिदपि सम्भवं नास्ति ।

2. प्रियदर्शिका नाटिकायां उदयनस्य प्रियदर्शिकया सह प्रणयः तदनन्तरं च विवाहस्य वर्णनमस्ति । प्रियदर्शिका आरण्यका नाम्ना उदयनस्य अन्तःपुरे आगच्छति अन्ततः उदयनस्य परिणीता भवति । अनयोः द्वयोः नाटकयोः चत्वारः-2 अङ्काः सन्ति ।

3. नागानन्द नाटकं तस्य तृतीय रचना अस्ति । अस्य कथानकं पञ्चसु अङ्केषु विभाजितमस्ति । अस्मिन् जीमूतवाहनस्य आत्मोत्सर्गस्य कथा निर्मिता अस्ति । जीमूतवाहनः गरुडस्य भोजनाय सर्पस्य स्थाने स्वात्मानं समर्पयति । तस्य [illegible] तुष्टा गौरीदेवी तं पुनर्जीवितं करोति । मृताः सर्पाः अपि

जीवितः संयाति निकलं दृश्यं दृष्ट्वा गरुडोऽपि प्रतिज्ञां
कृत्वा सर्पाहारस्य परित्यागं करोति। अस्मिन् रूपकेऽपि
हिन्दूनां बौद्धानां च विचाराणां सुन्दरं सामञ्जस्यमस्ति

उपसंहारः अधिकांशरूपेण एतानि नाटकानि शृङ्गार रसस्यैव प्रधानता
अस्ति। संस्कृत साहित्ये हर्षः एव नाटक परम्परायाः
प्रारम्भकः इति स्वीक्रियते। नाटके गुणानां दृष्ट्या तस्य
रचना संस्कृत साहित्यस्य अनुपमानि रत्नानि स्वीक्रियन्ते
वस्तुविन्यासे पात्रयोजनायां रसानामभिव्यञ्जने कथोपकथने
5. अभिनेयता तथा च भाषा शैली इत्यादीनां तत्त्वानां दृष्ट्या
तस्य नाटकानि पूर्णरूपेण सफलानि सन्ति।

प्रश्न॥ नाटककारः भवभूतिः संस्कृत साहित्ये कस्य स्थानस्य
अधिकारी इति तस्य नाटकानां आधारेण स्पष्टीयताम्?

उत्तरम्:- संस्कृत नाटक साहित्ये कालिदासस्य पश्चात् भवभूतेः
एव सम्माननीयं स्थानमस्ति। नवमशताब्द्याः
अन्तिमे दिवसेषु राजशेखरः स्वात्मानं भवभूतेः अवतारं
स्वीकरोत्। स्वीकारमकरोत्। भवभूतिना स्वनाटकेषु
संक्षिप्तरूपेण स्वकीयं परिचयं दत्तः अस्ति। तदनुसारेण
भवभूतिः विदर्भ प्रान्तस्य अन्तर्गते पद्मपुरनामके
नगरे अभवत्। स कृष्ण यजुर्वेदस्य तैत्तरीय शाखायाः
नागार्जुनस्य उदुम्बर वंशीय ब्राह्मण परिवारे अभवत्।
तस्य पितामहः भट्ट गोपालः तथा च पिता नीलकण्ठः आसीत्
मातुः नाम जातुकर्णी आसीत्। यद्यपि भवभूतेः
वास्तविकं नाम श्रीकण्ठः आसीत् परन्तु भवभूतिः नाम्ना
एव तस्य प्रसिद्धिः इति अस्ति। यद्यपि तस्य स्थिति काल—

दर्शनीयम्

नमस्यो पूर्वमन्यानि ग्रन्थानि आसन् परन्तु अधुना अप्राप्याणि। विद्वान्सः तस्य समयं ~~सप्तम शताब्द्याः~~ ईस्वि अष्टमशताब्द्याः पूर्वार्द्धम् मन्यन्ते।

नाटकानि :- रूपकाणि

(1) भवभूतेः नाम्ना त्रीणि ~~नाटकानि~~ उपलब्धानि सन्ति। मालती माधवं, महावीर चरितं तथा च उत्तररामचरितम्। मालती माधवं दशाङ्कानां विशालं प्रकरणमस्ति। तस्य कथा सर्वथा काल्पनिका अस्ति। अस्मिन् मालत्याः माधवस्य च प्रेमप्रसङ्गः सुन्दर रीत्या अङ्कितः अस्ति। यद्यपि अस्मिन् नाटके यौवनस्य उन्मत्तो चित्रितः अस्ति परन्तु सम्पूर्ण नाटके प्रेमणः उन्नतो उदात्ता च कल्पना प्रस्तुता अस्ति। लेखकः कामं निकृष्टं प्रेम समाजाय हानिकारकमिति स्वीकरोति।

2 महावीर चरितं :-

षडङ्केषु रचितं अस्मिन् नाटके वीर रसस्य प्रधानता अस्ति। कविः रामकथा-सम्बन्धिनाम् पूर्ण रूपेण नाटकानाम् अस्ति। इदं दर्शितुमिच्छति यत् ... अपि ... सन्ति ... राम विरुद्धानि रावणस्य प्रेरणा द्वारा सन्ति। आदर्श पुरुषस्य रूपेण रामस्य चित्रणं कविना दर्शनीयमस्ति। वालिवधस्य धारणायाः नवीनता भवभूतेः मौलिकतास्ति। वालिः रावणस्य सहायकः भूत्वा रामेण सह योद्धुमागतः आसीत्। अतएव रामद्वारा तस्य वधः अभवत्।

उत्तररामचरितम् :

अस्मिन् नाटके रामायणस्य उत्तरार्धम् अङ्कितम् अस्ति।

कथावस्तु — अस्य नाटकस्य कथावस्तु उत्तरार्धे संकलितम् अस्ति। ~~रामायणस्य~~ उत्तरकाण्डस्य एकः प्रसङ्गोऽस्ति यत् निराधारं लोकापवादं श्रुत्वा एव रामः सीतायाः परित्यागम् अकरोत्। इदमेव आधारं कृत्वा गत्वा कविद्वारा अस्य नाटकस्य रचना कृतोऽस्ति। रामायणस्य अपेक्षया अस्मिन् नाटके अनेकाः नवीनताः सन्ति। तथापि भवभूतेः कौशलेन मौलिकरूपेण दृश्यते। सप्तसु अङ्केषु विभाजिते अस्मिन् नाटके कथानकं व्यवस्थितम् अस्ति। (~~[illegible]~~) सीता लक्ष्मण-द्वारा आनीतानि चित्राणि पश्यन्ति। तस्याः मनसि तपोवनं पुनः द्रष्टुम् इच्छा उत्पन्ना भवति। दुर्मुख-नामकः गुप्तचरः सीता सम्बन्धी प्रचलितं लोकापवादं रामस्य समक्षे उपस्थापयति। सीतायाः त्यागस्य पश्चात् रामः दण्डके सीतायाः स्मरणे विलापं करोति। नाटकस्य पञ्चमेऽङ्के रामपुत्रलवस्य लक्ष्मणपुत्र चन्द्रकेतोः च युद्धवर्णनम् अस्ति। अन्ते च राम सीतायाः पुनर्मिलनं भवति। रामः लोकहिताय इमां प्रतिज्ञां करोति —

स्नेहं दयां च सौख्यं च यदि वा जानकीमपि।
आराधनाय लोकस्य मुञ्चतो नास्ति मे व्यथा॥

२. चरित्राङ्कण —

वस्तुतः उत्तररामचरितं १. भवभूतेः ~~[illegible]~~ सफलतमम् अस्ति। कथानकदृष्ट्या, २. पात्रचरित्रचित्रणदृष्ट्या, इदं नाटके अति प्रसिद्धम् अस्ति। अस्मिन् नाटके रामस्य सीतायाः च

प्रश्न९ → अत्रैव तस्याः आदर्श चरित्र चित्रणमस्ति। इदं नाटकं
~~रसस्य~~ तस्या वर्णनं लक्षयति। वाल्मीकि रामायणमस्य
नाटकस्य आधार ग्रन्थः अस्ति। वाल्मीकि रामायणस्य
आरम्भः करुण रसेन सह एव अभवत्। एतादृशी
रसस्य ~~...~~ स्थितिः भवभूति द्वारा अभिज्ञ नाटकेऽपि
उपस्थापिता अस्ति। मुख्य रूपेण विप्रलम्भ शृङ्गारः
अत्र ~~दृश्यते~~ परन्तु तस्य परिणतिः अपि करुण
रसे एव ~~दृश्यते~~ अस्ति स्वयं भवभूतिना इदं स्वीकृतमस्ति।

एको रसः करुण एव निमित्तभेदात्
भिन्नः पृथक् पृथगिवाश्रयते विवर्तान्।
आवर्त बुद्बुद तरङ्ग मयान् विकारान्
अम्भो यथा सलिलमेव तु तत्समग्रम्॥

अर्थात मुख्यतया नवसु रसेषु करुणरसस्य एव प्रधानता
अस्ति। (सीता वियोगे रामस्य विलापः अनेकेषु स्थलेषु
दृश्यते अस्ति) भवभूतिः कथयति यत् यथा
सलिलमेव जले क्वचित् तरङ्गाः क्वचित् बुद्
बुदाः क्वचित् च आवर्तान् भवन्ति परन्तु
तत् सर्वं जलस्य एव विकाराः सन्ति। अनेन प्रकारेण
मुख्य रसस्तु करुण एव, अन्ये रसाः तस्मादेव उत्पद्यन्ते
विलीयन्ते च। रामस्य कारुणिकी दशा विलापः
न केवल जनमानसः (अपितु) पशुपक्षिणः वनस्पतयः अपि
रुदन्ति एव। पाषाणमपि द्रवितं भवति, यथा —
अपि ग्रावा रोदित्यपि दलति वज्रस्य हृदयम्।
कथारूपेण अनन्तरं सीता रामसमीपे आगच्छति।

उदाहरण उपन्यस्त

स्वस्पर्शेन मूर्च्छां दूरीकरोति परन्तु
पश्यति च तां। ~~परन्तु [illegible]~~ रामः छायारूपिणीं
सीतां [illegible] पदे पदे विह्वलो भवति। गङ्गायाः पुत्रप्रसवात्
रामायणस्य प्रतिनायकस्तु सीता-निर्बन्धः प्रत्यक्षतः। अनेकानां
सहायता
राज्ञां इच्छा उपगतवान् अभवत् लक्ष्मणस्य साहाय्यं द्वारा
पुनः रामः तत्तु हि यदि जानाति। रामः सीतायाः निर्बन्धः
अनेन कारणेन अपि चिन्तितः अस्ति; यत् एकस्य अपवादस्य
भयात् तेन आत्मना प्रवर्तिता सीता अवश्यमेव (परिस्थितौ) ईदृशी
[illegible] कथं सा जीवनं धारणं करिष्यति इत्यादि
प्रयोगेषु राममुखात् प्रतिपदं करुणा एव उच्छलति। एतद्
उत्तररामचरितस्य कारुणिकं वर्णनं दृष्ट्वा आलोचकाः
इदं कथनमुचितमस्ति यत् उत्तररामचरिते भवभूतिः
विशिष्यते।

प्रश्न २ वेणीसंहार नाटकस्य संक्षिप्त परिचयः देयः ?
उत्तर — भट्टनारायणस्य वीररसेन रचिते अस्मिन् नाटके वीररसस्य
चमत्कारः दृश्यते। अस्य नाटकस्य कथानकं महाभारतात्
संगृहीतमस्ति। अस्य नाटकस्य रचयिता अष्टमशताब्द्याः
मध्यकालिकः आसीत्। वेणीसंहारस्य रचयिता भट्टनारायणः
जीवनस्य आरम्भे कान्यकुब्ज नगरे अवसत्। परिस्थितीनां
कारणेन वङ्गप्रान्तं गत्वा वङ्गप्रान्ते एव तस्य कर्मभूमिः
अभवत्। महाभारतस्य एका धारणा अस्ति यत् कौरवाणां
सभायां दुःशासनद्वारा द्रौपद्याः निरादरं सञ्जातम्।
तदा तस्याः प्रतिज्ञा आसीत् यावत् अस्य अपमानस्य
प्रतिकारः न भवति तावत् केशान् न बध्नामि

3 5
केषां कदा किम् कुत्र कृत:
1
सिद्धार्थ

सि॰२- [illegible] नामैव ज्ञायते । षट्सु अङ्केषु
विभाजिते अस्मिन् नाटके नामानुसारेण द्रौपद्याः वेण्याः
संहरणं (बन्धनं) भीम द्वारा भवति । नाटके इयं कवेः
मौलिकता अस्ति यत् कविना अनेक स्थलेषु नाट्य
कुशलतया: परिवर्त्य कृत्वा अनेकानि मौलिक परिवर्तनानि
~~[illegible]~~ । परन्तु एतानि परिवर्तनानि कानिचिद् मुख्य
कथायाः अनुकूलानि कानिचित् च प्रतिकूलानि ।
महाभारतस्य प्रसिद्ध पात्राणां संयोजनं अपि अस्मिन्
नाटके [illegible] । पात्राणां चरित्र चित्रणे विशेषरूपेण
[illegible] । अश्वत्थाम्नस्य चित्रणे भट्टनारायणस्य
[illegible] दृश्यते । समस्त नाटके वीररसस्य प्राधान्यमस्ति
परन्तु कतिपयेषु स्थलेषु करुणस्य शृङ्गारस्य शान्तस्य च
प्रयोगः लभ्यते एव । शृङ्गार प्रधाने अस्मिन् नाटके
दुर्योधनस्य भानुमत्याः च मध्ये प्रेम प्रसङ्गः कथञ्चिदपि
अनुकूलं न भजते इदमपि भवेत् यत् शृङ्गार रसस्य
चित्रणे कवेः विवशता अपि भवेत् तथापि प्रकृतीनां
[illegible] कथानकस्य च चित्रणं ओजपूर्णं
भाषायाः माध्यमेन कविद्वारा कृतं अस्ति । ओजगुणस्य
गौडी रीत्याश्च प्रयोगस्य प्रशंसा समीक्षकैः अपि कृता अस्ति ।
परन्तु कवेः नाटकीयकौशलं श्लोके सर्वैः श्लाघितमस्ति)

नाटकीय [illegible]

अनुकूलता

[illegible]

प्र०13 संस्कृत गद्य साहित्यस्य क्रमिकः विकासः प्रदर्शनीयः ?

उत्तरम् :- संस्कृत साहित्ये गद्यपद्ययोः सम्मिलित सुगन्धितं पुष्पमस्ति। पश्चात् संस्कृत साहित्ये गद्यस्य प्रयोगोऽपि प्राचीन कालादेव दृश्यते आसीत् परम्परायाम् यथा कृष्णयजुर्वेदस्य ब्राह्मण ग्रन्थानां उपनिषद् ग्रन्थानां तथा च महाभारतस्य अनेक सन्दर्भाणां प्रयोगं पश्यामः। कालान्तरे अनेकाः टीकाः व्याख्या तथा, साहित्यशास्त्रीयाः ग्रन्थाः चम्पू काव्यानि संस्कृत गद्यस्य प्रौढ़ रूपमस्ति। तत्पश्चात् दर्शन ग्रन्थेषु ज्योतिष ग्रन्थेषु व्याकरण ग्रन्थेषु च गद्यस्य विद्यमानता दृश्यते एव। आचार्य बलदेव उपाध्यायस्य कथनमस्ति यत् संस्कृत साहित्ये वैदिक पौराणिक कालादारभ्य अद्यावधि गद्य साहित्यस्य अनेक रूपाणि (अभिजात साहित्ये) दृश्यन्ते। प्राचीन कालादेव वर्तन्ते दीर्घ समासानि युक्तानि गद्यानि समासरहितानि च लघुसमास रहितानि गद्यानि मिलन्ति। परन्तु यादृशं समृद्ध पद्य साहित्यं इदानीमुपलब्धमस्ति नास्ति तादृशं गद्यसाहित्यम्। कोलपत्रेषु शिलालेखेषु गद्यस्य उदाहरणान्यपि मिलन्ति। एतेषां गद्यानां तुलना वर्तन्ते साधु शैल्या नहि अपितु आविर्भवन्ति। उक्तः इदं स्पष्टं भवति यत् गद्य-काव्यस्य सम्पन्न रूपं दण्डिनः, सुबन्धोः बाणस्य च पूर्वं प्रचुरतया आसीत्। इदमावश्यकमस्ति यत् एतेषां गद्यकाराणां गद्य-काव्यानि एव इदानीमुपलब्धानि सन्ति। संस्कृत गद्य साहित्ये सुबन्धोः वासवदत्ता दण्डिनः दशकुमारचरितं

बाणभट्टस्य च हर्षचरितं तथा कादम्बरी संस्कृत गद्यसाहित्यस्य निधिं प्रदर्शयन्ति। कालान्तरे गद्यमार्गे दण्डिमार्गानुप्रभावः आसीत्। अतः परवर्तिनः गद्यकाराः स्वाभाविकतया प्रभाविताः सन्ति। धनपालस्य तिलकमञ्जरी वादीभसिंहस्य "गद्यचिन्तामणि" वामनभट्टस्य "वेमभूपालचरितं" इत्यादयः गद्य ग्रन्थाः प्रसिद्धाः सन्ति।। मध्यकाले संस्कृतसाहित्यस्य एतादृशः कालः आसीत् यत् तदानीं काव्यशास्त्रस्य लक्षण ग्रन्थानां रचनायाः प्रचारः आसीत्। अतः पद्यकाव्येन सह गद्यकाव्यमपि निश्चित कालपर्यन्तं विराममेव अवाप्नोत्। आधुनिके युगे हृषीकेश भट्टाचार्यस्य "प्रबन्धमञ्जरी" तथा च अम्बिकादत्तव्यासस्य शिवराजविजयमिति द्वे गद्यकाव्ये दृष्टिपथे आगच्छतः।

अतः गद्यकाव्यस्य या सरणि (नदी) आदिकालात् प्रवाहिता आसीत् वैदिक साहित्ये तस्य धाराः निर्बाध रूपेण प्रवाहिताः अभवन्। तदनन्तरञ्च ब्राह्मणादिग्रन्थमाध्यमेन अनेकेषां गद्यकाव्यानां रचना संस्कृत साहित्ये मिलति एव ~~गद्य~~ पद्यसाहित्यस्य तादृशी स्थितिः नासीत् ~~यथा~~ यादृशी पद्यस्य। तस्य एकं मुख्यं कारणमिदमपि अस्ति यत् पद्यकाव्यानां कण्ठीकरणं सुलभं सरलं च आसीत् किन्तु गद्यात्मक स्मरणं परिवर्तनं सरलं नासीत्। अतः गद्यं प्रति विशेषानुरागः न दर्शितः कैश्चित्। ~~द्वितीयमिदं~~ द्वितीयमिदं कारणं यत् पद्य रचना यथा सरला

भवति न भवति तादृशी गद्य रचना । छन्दसु कविता-
निर्माणं सरलमेव । छन्दसां प्रत्येकचरणेषु प्रति कति
अक्षराणि सन्ति शब्दानामभ्यासानां माध्यमेन
कविः कर्तुं शक्नोति । परन्तु गद्य रचनायां प्रत्येक शब्दः
सन्तुलितः भवति । अतः यथा पद्यस्य वाचिकम् मुखवलें
वर्तते तथा संस्कृत गद्यमपि मौलिक ग्रन्थानां माध्यमेन
टीकानामालोचकानां माध्यमेन समुज्ज्वलितम् ।

प्रश्न 5 दण्डिनः दशकुमार चरितस्य कथायाः संक्षेपेण परिचयः
देयः तथा च दण्डिनः पदलालित्यमपि प्रदर्शयताम् ?

उत्तरम् :- दशकुमारचरितस्य वस्तुतः ~~[illegible]~~ दण्डी आचार्य दण्डी इति
रूपेण प्रसिद्धः आसीत् । लक्षण ग्रन्थकारेषु यत् स्थानं
आचार्यभामहस्यास्ति तत् स्थानं दण्डिनः अपि विद्यते ।
दण्डिनः प्रसिद्धः तथा तस्य लक्षण ग्रन्थस्य काव्यादर्शस्य
समादरेण भवति । यथा गद्य रचना दशकुमारचरितस्य
समादरेण अस्ति । वर्तमान काले दशकुमार चरितस्य
मध्ये त्रयः भागाः सन्ति । पञ्चोच्छ्वासानां
पूर्व पीठिका अस्ति ~~[illegible]~~ तदनन्तरं मष्टसु उच्छ्वासेषु
कथा आसीत् चरितमस्ति । एतेषु उच्छ्वासेषु अष्ट
निकुमाराणां राजकुमाराणां चरितमस्ति । ~~[illegible]~~ तदनन्तरं
~~अत्पीठ~~ उत्तरपीठिका अस्ति । कतिपयानामालोचकानां
कथनमस्ति यत् दशकुमार चरितं गुणाढ्यस्य बृहत्कथया
प्रभावितमस्ति । दशकुमार चरिते विभिन्नानां राजकुमाराणां
कथा निबद्धा अस्ति । अतः मुख्य कथायां अनेकाः अवान्तराः
कथाः सम्मिलिताः सन्ति । कतिपयाः आलोचकाः इदमपि

स्वीकुर्वन्ति यत् पञ्चतन्त्रादि कथानां माध्यमेन नीति
शास्त्रस्य शिक्षा एव दण्डिनः उद्देश्यमासीत् । परन्तु
सहृदयतायाः अनुरञ्जनमपि वयं तत्र पश्यामः । यद्यपि
नीतिशास्त्रस्य, राजनीतिशास्त्रस्य, कामशास्त्रस्य च
विवेचनं वयं दशकुमारे पश्यामः परन्तु लोककथानां
माध्यमेन काव्यकौशलप्रदर्शनमपि दण्डिनः उद्देश्यमासीत् ।
यद्यपि कथासु अनेके प्रसङ्गाः एतादृशाः सन्ति ये लोक
व्यवहाराय उपयुक्ताः न सन्ति । दण्डिनः भाषा प्राञ्जलता
पूर्णास्ति । विषयस्य शैल्याः च निर्वाहः अनुपम
रूपेण वयं पश्यामः । गद्यकाव्ये न केवलं गद्यस्य
अपितु विभिन्नशास्त्राणां विषयाणां समायोजनमपि
कृतं दृश्यते ।

दण्डिनः पदलालित्यम् :-

आलोचकानामिदं कथनमुपमा कालिदासस्य
भारवेरर्थगौरवं दण्डिनः पदलालित्यं माघे सन्ति
त्रयो गुणाः, दण्डी मूलतः लक्षणग्रन्थकाराचार्यः अस्ति
परन्तु दशकुमारचरितस्य रचना द्वारा तेन इयं धारणा
निरस्ता विद्वद्भिः कृता यत् आचार्यः कविः भवितुं
न शक्नोति । लक्षणग्रन्थे यत्र वयं तस्य बुद्धिवैभवं
पश्यामः तत्र दशकुमारचरिते हृदयस्य माधुर्यमपि
कठिन समास अनुभवामः लभ्यते एव । दण्डी दशकुमारचरिते
समास रहितानां शब्दानामप्रयोगं करोति कुत्रापि वयं
गद्य शैल्याः शब्दालङ्कारालङ्काराणां चमत्कारं वर्णनस्य
विस्तारं न पश्यामः । सामान्यलोककथानां माध्यमेन

उत्तरम्

अनेन दशकुमारचरितम्। दशकुमारचरितं काव्यस्य
आख्यायिका उदाहरणं वर्तते । या शैली दण्डिनः आसीत्
सा न काव्यस्य न च दुष्करं; श्लेषस्य परिसंख्यालंकारस्य
विरोधाभासस्य बाहुल्यं तत्र काव्यस्य मध्ये पश्यामः । तत्र
[illegible] इमौ प्रतिज्ञामकरोत् प्रत्याहार
श्लेषगर्भे प्रयत्नः अनयोति न केवलं शब्देषु अपितु
अर्थे प्रत्याहार श्लेषस्य उपस्थितिः दुष्करत्वं वैशिष्ट्यमस्ति
दशकुमारचरिते पञ्चतन्त्रवत् कथानां माध्यमेन नीति
शास्त्रस्य शिक्षामपि ददाति । दण्डी यथा आख्यायिकानां
दुष्करं करोति तथा भाषायाः सारल्यमपि दर्शयति ।
दशकुमारचरिते गद्यशैल्याः अनुपमः पाण्डित्यं । वैदर्भीरीतिः
रीतिः दण्डिनः प्रियतमा आसीत् । भावैः सह तस्य
भाषा अपि [illegible] प्रवाहपूर्णा तथा च [illegible]
[illegible] । [illegible] अभिव्यक्तिः शब्द-
विन्यासस्य चारुता कल्पनायाः उर्वरता दण्डिनः
विशिष्टाः गुणाः सन्ति । दण्डिनः पदलालित्यस्य
प्रशंसा विद्वद्भिः न केवलं अपितु अन्यैः
[illegible] । [illegible] शैल्यां [illegible]
[illegible] प्रसादगुणता पदे पदे पश्यामः ।
यथा उदाहरणम् -
क्षीणनीरं तडागम्, ओषधयो वन्ध्याः, न फलवन्तो वनस्पतयः
क्लीबा मेघाः, पङ्कशेषाणि पल्वलानि, निःस्यन्दानि सलिल-
मण्डलानि, गलिताः कल्याणकोत्सव क्रियाः, बहुलीभूतानि
तस्करकुलानि इत्यादि अतः दण्डिनः पदलालित्यमस्ति यथा
तदानीं प्रासादिकमासीत् तथा स्वाभाविकमपि ।

[illegible]

25

प्र०१५ बाणस्य रचना काले प्रदर्श्य तस्य रचना कौशलं प्रदर्शयत ?

उत्तरम् — ये संस्कृतस्य अन्य कवीनां काल निर्धारण सम्बन्धे संदिग्धा सन्ति न तथा बाणस्य विषये। स्वयं बाणेन हर्षचरितस्य प्रथमेषु उच्छ्वासेषु तस्य च कादम्बर्याः प्रस्तावनायां पद्येषु स्ववंशस्य परिचयः दत्तः अस्ति। तदनुसारेण तस्य पिता चित्रभानुः तस्य च माता राजदेवी आसीत्। ~~बाल्ये काले एव~~ पितरौ दिवंगतौ [illegible] बाल्यकाले एव अनाथः एव संजातः। [illegible] अतुला सम्पत्तिः आसीत्। अतः बाणः कतिपयैः मित्रैः सह देशाटनं ~~कृतवान्~~। [illegible] तत्र अत्यधिकाः अपकीर्तिः जाता परन्तु [illegible] अनुभवः बाणस्य सिद्धिः आसीत्। एकदा बाणः [illegible] [illegible] [illegible] अतः स्वस्य शीघ्रमागमनाय [illegible] बाणस्य [illegible] जाता परन्तु पश्चात् तस्य विद्वत्ता [illegible] तस्मै राजसभायामपि [illegible]। हर्षवर्धनस्य [illegible] शासनकालः सप्तमशताब्द्याः पूर्वार्धे निश्चीयते। अतः सप्तमशताब्द्याः मध्ये [illegible] बाणस्य [illegible] रचनाः [illegible] अष्टमशताब्द्याः समाप्तौ वामनेनापि [illegible] [illegible] [illegible] "अनुकरोति भगवतो नारायणस्य" इति शब्दाः उद्धृताः सन्ति

2 — [illegible] (margin note)

9.2

[हर्षचरितं बाणेन श्रीहर्षस्य जीवनस्य वर्णनम् उपलभ्यते तेन सम्राट् स नृपस्य सम्राज्ञाणता:] ।

रचना :-

हर्षचरितम् :- [यद्यपि बाणभट्टस्य चण्डीशतकं, पार्वतीपरिणयः, मुकुटताडितकं, रत्नावली, हर्षचरितं तथा च कादम्बरी इत्यादयः ग्रन्थाः उपलभ्यन्ते परन्तु {बाणस्य कीर्तिः हर्षचरितस्य कादम्बर्याश्च आधारेण अस्ति]

हर्षचरितम् आख्यायिका ग्रन्थोऽस्ति । [प्रथमं तेन हर्षचरिते स्ववंशस्य एव परिचयः दत्तः तदनन्तरं ... आक्रोशात् हर्षस्य] ऐतिहासिक घटनानाम् आधारे रचिता अस्ति । हर्षचरिते कल्पनायाः तादृशः कल्पनायाः परिचयः नास्ति यादृशी कल्पना तेन कादम्बर्याः आधारेण आधिगता । न केवलं अस्मिन् ग्रन्थे हर्षस्य चरित्रं वर्णितं अपितु तस्य वंशस्य, हर्षस्य पितुः ज्येष्ठभ्रातुः भगिन्याश्च कथानकम् अस्मिन् ग्रन्थे मिलति । इति हासस्य कारणात् हर्षचरितस्य भाषायां तादृशी गूढता नास्ति यादृशी कादम्बर्यां वर्तते प्राञ्जलता । कोऽपि पाठकः न ग्रन्थं पठितुं ज्ञातुं च समर्थः भविष्यति ।

कादम्बरी :-

बाणस्य कीर्तिः लता कादम्बर्याम् एव आधिक्येन निर्भरा अस्ति । कादम्बर्याः पूर्वार्धः बाणभट्ट द्वारा रचिता अस्ति उत्तरार्धस्य रचना बाण पुत्र द्वारा कृता अस्ति स्वयं तेन इदं निवेदितं कृतम् ... कादम्बर्याः

कथा न एकं जन्मनः अपितु त्रीणि जन्मानि सम्बधिता अस्ति। चन्द्रापीडस्य पुण्डरीकस्य च त्रीणि जन्मानि अत्र उल्लिखितानि सन्ति। आरम्भे (विदिशा) नृपस्य शूद्रकस्य परिसरे तस्य सभायां एका चाण्डालकन्या वैशम्पायनं इति नामकं शुकं धारयित्वा आगच्छति। मनुष्यभाषया सः शुकः उपस्थितानां तेषां सर्वेषां मनोरञ्जनं करोति। तदनन्तरं कादम्बर्याः कथा आरभते। महर्षि जाबालि द्वारा वर्णितस्य चन्द्रापीडस्य तथा च तस्य मित्रस्य वैशम्पायनस्य कथापि अस्मिन् आगच्छति। राजा चन्द्रापीडः दिग्विजययात्रां गच्छति। चन्द्रापीडस्य कादम्बर्याः च हृदये स्नेहस्य आकर्षणस्य भावना जायते एतावती कथा कादम्बर्याः मिलति।

काव्यकौशलं बाणोच्छिष्टं जगत् सर्वम्?

अस्याः कादम्बर्याः कथा कल्पनाप्रसूता अस्ति तथापि ना ~~[illegible]~~ कथा मौलिकत्वेन संयोजिता। [illegible] कथानुसारेण इयं कथा कल्पना गुणाढ्यस्य बृहत्कथा इति ग्रन्थात् गृहीता अस्ति। बाणद्वारा इयं कथा मौलिकरूपप्रदानेन विभूषिता अस्ति। कादम्बर्याः महाश्वेतायाः शुकस्य च कथा चतुरशैल्यां रचिता अस्ति। [अनेकानां कथायाः पात्राणां च चित्रणं मनोरञ्जकं अस्ति।] शुकनासोपदेशः (तत्र शुकनासोपदेशः) संस्कृतसाहित्यस्य अनुपमा निधिः अस्ति। लघुना शब्दानां माध्यमेन बाणेन मानवजीवनस्य वास्तविकं चित्रस्य चित्रणं

कृतमस्ति । कादम्बरी द्वारा न केवलं प्रणयः कथा आकृता भवति अपितु सामाजिक परिस्थितीनां ज्ञानमपि अस्य तत्र लभामहे । अस्मिन् काव्ये बहुसंख्या जीवनस्य विविधाः अनुभवाः लिखिताः सन्ति । कादम्बर्याः वर्णनानि विविधानि भावपूर्णानि चरमोत्कर्षस्य परिचायकानि सन्ति । अतः कादम्बर्याः गद्य पद्य काव्ययोरपि तस्य साहित्यस्य विन्यासः काव्यकारस्य संस्कृत भाषायाः चतुष्कला तथा च तस्य शैली गद्य काव्यस्य आदर्शभूता इति स्वीकुर्वन्ति । मौलिक कल्पना (कविकल्पना) तुकान्तपूर्ण स्वभावोक्ति अलंकारश्च श्लेषः परिसंख्यालंकारस्य रचनाविन्यासः इत्यादयः काव्यस्य विशेषतायाः प्रत्यक्षाः सन्ति । काव्यस्य शैली शब्दानां गुम्फनं भाषायाः सौन्दर्यं मनोरञ्जनं दर्शनीयमस्ति । वर्णयति तस्य शैली पदलालित्यमारोहति । वर्णयति च धरातलस्य स्पर्शं करोति नायकः काव्यस्य अनुसारेण भवति । प्रसङ्गानुसारेण अयं बाणः विकट विषयस्य वर्णनं करोति तदा तस्य भाषा दीर्घ समासानां माध्यमेन चलति परन्तु यदा भावपूर्ण चित्रणं तत्र सरल भाषा लघु वाक्यानि तस्य काव्य वैभवं आभासयन्ति स्म । अतः बाणेन संस्कृतसाहित्ये यत् उल्लिखितं तत् अन्यत्र दुर्लभमस्ति । केवलं यस्य उल्लेखः बाणेन न कृतः तस्य लेशोऽपि परवर्तिनां, पूर्ववर्तिनां केनापि कविना न कृतोऽस्ति । अनेन कारणेन बाणोच्छिष्टं जगत् सर्वमिति कथ्यते । अतः बाणस्य इदं कथनं नितान्त साहित्यिक निष्कर्ष च ददाति ।

प्र.18 श्रीहर्षस्य जीवन परिचयः तस्य काव्यस्य च सामान्य परिचयः देयः।

उत्तरम् — माघस्य पश्चात् संस्कृत महाकाव्यकारेषु श्री हर्षस्य एव स्थानं गणनीयमस्ति द्वादश शताब्द्याः उत्तरार्द्धे श्री हर्षेण नैषधीयचरितमिति महाकाव्यस्य रचना कृता। माघस्य पश्चात् अस्य काव्यस्य प्रसिद्धिः पर्याप्तमात्रा जाता। श्री हर्षः कान्यकुब्ज राजसभायाः पण्डितः आसीत्। स्वग्रन्थे तेन लिखितमस्ति यत् —

→ "ताम्बूलद्वयमासनं च लभते यः कान्यकुब्जेश्वरात्"

श्रीहर्षस्य समये कान्यकुब्जस्य राजा विजयचन्द्रः अथवा जयचन्द्रः आसीत्। अतः अनेन प्रमाणेन श्रीहर्षस्य समयः द्वादश शताब्द्याः उत्तरार्द्ध एव स्वीक्रियते। कविना स्व महाकाव्यस्य प्रति सर्गान्ते स्व पितुः नाम श्रीहीरः तथा च मातुः नाम मामल्लदेवी इति निर्दिष्टमस्ति।

एकस्याः किम्वदन्त्याः अनुसारेण श्री हर्षस्य पितुः नैयायिकेन ~~उदय चारेण~~ उदयनाचार्येण सह शास्त्रार्थम् अभवत्। तस्मिन् हर्षस्य पिता पराजयं प्राप्तवान्। मृत्यु पर्यन्तं तस्मिन् तस्य मनसि प्रतिशोधस्य भावना आसीत्। परन्तु सः किमपि कर्तुं न अशक्नोत्। मरणात् पूर्वं पिता तां धारणां पुत्रस्य समक्षे स्थापितम् (स्थापितवान्)। श्री हर्षः गङ्गातीरे गत्वा चिन्तामणि इति मन्त्रस्य वर्ष पर्यन्तं जापं कृत्वा भगवत्या त्रिपुरायाः वरदानेन अपराजेयं पाण्डित्यं लब्धवान्। पितुः कथानुसारेण उदयनाचार्यस्य मानमर्दनाय श्री हर्षेण खण्डन-खण्डखाद्य

तावद् भा भारवेर्भाति यावन्माघस्य नोदयः
उदिते नैषधे काव्ये, क्व माघः क्व च भारविः)

इति ~~काव्य~~ वेदान्त ग्रन्थस्य रचना कृता ।

कृतयः :-

खण्डनखण्डखाद्य, स्थैर्य-विचारणाप्रकरणं, विजयप्रशस्ति, छन्दःप्रशस्ति, गौडोर्वीशकुलप्रशस्ति, नवसाहसाङ्कचरित, ईश्वराभिसन्धिः, अर्णववर्णनं, शिवशक्तिसिद्धिः तथा च नैषधीयचरितम् । मुख्यरूपेण श्रीहर्षस्य प्रसिद्धिः दर्शने तु खण्डनखण्डखाद्यमिति ग्रन्थानुसारेण अस्ति । साहित्ये च स्थानं नैषधीयचरितमिति महाकाव्यमस्ति । अत्र वयं नैषधीयचरितस्य विवेचनं कुर्मः ।

नैषधीयचरितम् :-

अस्मिन् महाकाव्ये नल-दमयन्त्योः प्रेमपूर्वकस्य विवाहस्य कथा एव (अस्मिन् महाकाव्ये) वर्णितास्ति । महाभारतात् गृहीत ~~संगृहीत~~ अस्मिन् महाकाव्ये द्वाविंशतिः सर्गाः सन्ति । प्रतिसर्गं शताधिकानि पद्यानि सन्ति । दमयन्ती तथा च नलः इति द्वयोः विवाहस्य कथा एव नास्ति अपितु प्रेमगाथायाः अंश एव तेन गृहीतः अस्ति । नलदमयन्त्योः कथा यद्यपि साहित्यिकी अस्ति तथापि लोककथारूपेण प्रचलिता एव । श्रीहर्षः प्रकाण्डपण्डितः आसीत् । श्रीहर्षे पूर्ववर्तीनां कवीनां प्रभावः अत्यधिकः दृश्यते । मुख्यतया कालिदासेन माघेन च सः अत्यधिकं प्रभावितोऽस्ति । कतिपयेषु स्थानेषु रघुवंशमहाकाव्यस्य उपरि एव प्रभावः दृश्यते । नैषधीयचरितमनेकाभिः दृष्टिभिः संस्कृतसाहित्यस्य अनुपमं महाकाव्यमस्ति । इदं महाकाव्यं रचनायाः परिपाकदृष्ट्या पूर्णरूपेण सम्पन्नमस्ति

अलंकाराणां गुणरीतीनां च प्रयोगः काव्यसौष्ठवं वर्द्धयत्येव । काव्ये कवीनां कल्पनासमुत्कृष्टा दीप्तिः अस्ति । इदं महाकाव्यं संस्कृतसाहित्ये अमरकीर्तिं प्राप्नोति । नैषधीयचरितस्य समानस्य काव्येषु नास्ति स्थानं परन्तु अस्य कारणमिदमस्ति यत् कविद्वारा एव प्रतिभायाः दुरुपयोगः कृतोऽस्ति । पूर्ववर्तीनां कवीनां प्रभावः तस्मिन् महाकाव्ये स्पष्टं दृश्यते । इदं महाकाव्येषु शृंगार सागरे अमृतस्य चन्द्रमा अस्ति । अस्य महाकाव्यस्य पण्डितसमाजे सम्माननीयं स्थानमस्ति । इदमपि जनाः वदन्ति यत् मम्मटः इमं ग्रन्थमवलोक्य व्याजस्तुतिः नामकस्य अलंकारस्य माध्यमेन उक्तवान् यत् अस्मिन् महाकाव्ये काव्यगताः सर्वे दोषाः सन्ति । यद्यपि पाण्डित्यस्य प्रदर्शनं तस्मिन् काले समाजस्य मुख्या अपेक्षा आसीत् तदनुसारेण एव कविद्वारा एतादृशमद्भुत पूर्णं काव्यं रचितमस्ति ।

अस्य महाकाव्यस्य अनेकेषु सर्गेषु अनेकेषां काव्यकाराणां दार्शनिकानां उपहासः ~~[illegible]~~ दृश्यते । श्लेष नामकस्य अलंकारस्य प्रयोगे श्रीहर्षस्य प्रतिभा सन्तुला अद्वितीया अस्ति । महाकाव्यस्य त्रयोदश सर्गे दमयन्त्याः विवाहप्रसङ्गे श्लेषस्य माध्यमेन पञ्च नलानां वर्णनं मिलति । अन्यत्रापि श्लेषस्य उदाहरणानि मिलन्ति एव ।

अतः भावदृष्ट्या, अलंकारदृष्ट्या, शब्दरचनादृष्ट्या,

इदं महाकाव्यमनुपममस्ति । ग्रन्थोऽयं न केवलं काव्य-मात्रं, दर्शनशास्त्रस्य अपि अनुपमः निधिः अस्ति । अस्य ग्रन्थस्य वैशिष्ट्यमुद्दृश्य आलोचकानामिदं कथनं नैषधं विद्वद् औषधमिति नूनं सार्थकं अस्ति ॥

प्र०7. सुबन्धोः जीवनवृत्तं प्रदर्श्य संस्कृत गद्य साहित्ये तस्य रचनायाः स्थान निर्धारणं क्रियताम् ?

उत्तरम् :- प्रायेण संस्कृत कवीनां इयं धारणा आसीत् यत् ते स्वपरिचयं दत्वा स्वकीया सीमां संकुचितां न अनुकुर्वन् । सानुपूर्व कर्तव्यक्रमेन विचारेण ते निरन्तरं आनन्दं विश्वं च तेषां आसीत् । अनयैव भावनया सुबन्धुः अपि स्वग्रन्थे स्वकीये विषये न किञ्चिदपि उक्तवान् । बाणभट्टः कादम्बर्यां सुबन्धोः ग्रन्थस्य अनुकरणं करोति । अनेन सुबन्धुः बाणात् पूर्ववर्ती इत्यायाति । हर्षचरिते बाणेन सुबन्धोः रचनायाः वासवदत्तायाः उल्लेखोऽपि कृतः । वामनेन स्वकीये लक्षण ग्रन्थे वासवदत्तायाः उदाहरणानि संगृहीतानि सन्ति । वाक्पतिः राजा स्वकीये प्राकृतकाव्ये गउडवहो इति ग्रन्थे सुबन्धोः उल्लेखं तु कृतवान् परन्तु न बाणस्य । अनेन इदं स्पष्टं भवति यत् अष्टम शताब्द्याः मध्यकालिको कविः सुबन्धोः प्रसिद्धिं तु जानाति स्म परन्तु तदा बाणस्य प्रसिद्धिः जगति ख्याता नासीत् । अनेन कारणेन स्पष्टं प्रमाणानामाधारेण सुबन्धोः कालः षष्ठ ~~शताब्द्याः~~ शताब्द्याः अन्ततः एव निश्चेतुं शक्यते ।

वासवदत्ता

रचना :- सुबन्धोः एकमात्रं गद्यकाव्यम् अस्ति वासवदत्ता । इदं गद्यकाव्यं सुबन्धोः मानसिकी उद्भावना अस्ति । कथायां चिन्तामणिपुत्रः कन्दर्प-

केतुः स्वप्ने एकां अनुपमां पश्यति । कामेन मकरन्देन सह तां अपरिचितां सुन्दरीं अन्वेष्टुं सहसा गृहात् निर्गच्छति । विन्ध्यपर्वते सः एकं वृक्षं पश्यति यत्र शुकस्य पत्नी सारिका पतिं प्रताडयति । शुकस्य वार्तालापेन सः जानाति यत् यथा सः तां कन्यां द्रष्टुं व्याकुलः तथैव सा कन्या अपि तं अवलोकितुं व्यग्रा अस्ति । वासवदत्तायाः पिता तस्याः विवाहं अपरेण राजकुमारेण सह कर्तुं इच्छति । प्रेमी युगलं सहसा विन्ध्याचल पर्वतं गच्छति । तत्र युगलं निद्रां मग्नं भवति । प्रातःकाले राजकुमारः वासवदत्तां न पश्यति आकाशवाण्याः माध्यमेन तयोः पुनः मिलनस्य उद्भावना भवति । सुबन्धुः सुन्दर ~~भाषा द्वारा~~ वर्णनानां योजना द्वारा कथानकं मण्डितं करोति । यद्यपि अस्मिन् गद्यकाव्ये कथानकस्य स्वल्पता अस्ति परन्तु वर्णनं विस्तृतम् अस्ति । सुबन्धुः अनेक विषयानां ज्ञाता आसीत् । अतः तेन श्लेष द्वारा उपमा द्वारा च शब्दानां काव्यं भूषितम् अस्ति । तस्य प्रतिज्ञा आसीत् प्रत्यक्षरं श्लेषमयम् । अस्याः प्रतिज्ञायाः तेन आद्योपान्तं पालनं कृतम् । श्लेषस्य विरोधाभासस्य च माध्यमेन तस्य काव्ये दुरूहता अपि आगता । अलंकाराणां प्रयोगानां सीमा तेन अनेक स्थलेषु अतिक्रान्ता । सुबन्धोः गद्यशैल्यां नवीनता चमत्कारिता अपि सूत्राः गुण सम्पन्ना अस्ति । प्रायेण अनेके आलोचकाः अस्य ग्रन्थस्य दुरूहतायाः कारणात् आलोचनाम् तत् काव्यं कठिनमिति

उद्भा पक्ष

मन्यन्ते परन्तु यदा सः समासरहितानां शब्दानां प्रयोगं करोति तदा तस्य गद्यं मनोहारकं भवति । यथा :- "दुष्कान्ते कान्तमति । मन्दं मादमयम् बाष्पबिन्दून् । दीर्घकालङ्कृते दीर्घिके । निचारय नालिनीदलतालवृन्तै-र्नोद्वीतान् । एहि भगवति निद्रे अनुगृहाण माम्, धिक् इन्द्रियवैरपरैः । इत्यादि अतः गद्यकाराणां सहितानां नव प्रथमं दुष्करोः स्थानं । परवर्तिनः नवि गद्यकवयः तेन गद्यकाव्येन प्रभाविताः सन्ति ।

प्र०18 अम्बिकादत्त व्यासस्य संक्षिप्त परिचयं दत्वा तस्य अमर कृतिः शिवराजविजयमाधुनिक युगस्य श्रेष्ठ गद्यकाव्यमिति स्वतर्केण अङ्गनीयः ?

उत्तरम् :- प्रायेण संस्कृत गद्य क्षेत्रे एतादृशाः कवयः न अभवन् येषां गणना श्रेष्ठ गद्यकारेषु भवत् । अनेक शताब्दी पर्यन्तं संस्कृत गद्य लेखनस्य विरामः एव आगतः । एकोनविंशति-शताब्द्यां आधुनिक क्षेत्रे गद्यकारेषु एक-मुल्लेखनीयं नाम अस्ति अम्बिकादत्त व्यासः । अम्बिकादत्तव्यासः स्व ग्रन्थस्य प्रस्तावनायां स्वकीयं परिचयमददात् । कथावाचकः अम्बिकादत्त व्यासः स्वजीवनस्य प्रारम्भे अनेकेषां कथानामनुश्रवणमकरोत् । तस्य पूर्वजाः जयपुर राज्यस्य निवासिनः ~~आसीत्~~ आसन् । तदनन्तरं च ते ततः आगत्य काशीमागच्छन् तत्रैव अम्बिकादत्त व्यासस्य शिक्षा दीक्षा जाता । साहित्याचार्यस्य उपाधिधारी अम्बिकादत्त व्यासः बिहार प्रान्ते राजकीये संस्कृत महाविद्यालये अध्यापन-

कार्यमकरोत । अम्बिकादत्तव्यासः बहुमुखी प्रतिभायाः धनी आसीत । संस्कृतेन सह हिन्दी भाषायाः ब्रज भाषायाः आङ्ग्ल भाषायाः अपि सः प्रकाण्ड पण्डितः आसीत । लेखन कला तस्मै ईश्वरस्य वरदानमासीत । हिन्दी भाषायाम् अथ संस्कृत भाषायाम् च तेन पञ्चसप्ततिः रचनाः रचिताः । बिहार प्रान्ते एव संस्कृत संजीवनी समाजस्य स्थापना कृत्वा आजीवनं संस्कृतस्य सेवा एव तस्य जीवनस्य उद्देश्यमासीत । शिवराजविजय

रचना :

इदं मया पूर्वमेव उक्तं यत् अम्बिकादत्त व्यासस्य पञ्चसप्ततिः रचना आसन् । परन्तु तस्य प्रसिद्धिः शिवराजविजये एव निर्भरा अस्ति । तेन छत्रपति शिवाजी महाराजस्य जीवनस्य चित्रणं तस्मिन् गद्यकाव्ये कृतमस्ति । द्वादश निश्वासेषु रचिते अस्मिन् गद्यकाव्येन भारते स्वातन्त्र्य संग्रामस्य जनजागरणे महती साहाय्यता दत्ता । (अस्मिन् ऐतिहासिके गद्यकाव्ये इतिहास साहित्ययोः सामञ्जस्यमस्ति) अस्य कथायाः नायकः शिववीरः भारतीयानां आदर्शानाम् रूपमनुदाहरणमस्ति "कार्यं वा साधयेयं देहं वा पातयेयं" इति शिववीरस्य इयं प्रतिज्ञा दर्शनीया अस्ति । तेन स्वकीयं प्रतिज्ञा आजीवनं पालिता । शिवराजविजये शिववीरस्य अलौकिकी चारित्र्यं प्रतिपदं पश्यामः । अस्य गद्यकाव्यस्य प्रधानरसः वीरोऽस्ति । परन्तु तेन सह अन्ये रसाः अपि तत्र कल्पनस्य ...

वर्धयन्ति । आदिवत्र इव ग्रामः भत्र वीररसस्य अभिव्यक्तिरपि काव्ये तेऽपि भान्ति अतिशयमानिता।
यथा :-

"हर हर महादेव" गगनपुरन्ध्र छिन्धि-भिन्धि-मारय विदारय-इति, कोलाहलः प्रत्यर्थिनः च "खुदातोबा-अल्लाह" पारस्यपदभयः कलकलो रोदसी समपूरयत"।

शिवराजविजयस्य भाषा अपि सौन्दर्यं प्रकटयति। सरलानां प्रचलितानां शब्दानां माध्यमेन अभिव्यक्ता कथाः इदं काव्यं सर्वं सम्पन्नमकरोत्। उत्सुकता एवं जिज्ञासा अस्य काव्यस्य विशेषता अस्ति। पाठकः अनेन निश्चितरूपेण प्रभावितः भवति। अलंकाराणां सामाजिकैः द्वारा काव्यसौन्दर्यं वर्धयति। एवं भाषाणां गुणानां तिसृणां रीतीनां प्रयोगः अस्मिन् काव्ये सौन्दर्यमेव उत्पादयति। अनुप्रासस्य इयं छटा कस्य मनः न हरति। यथा -

जल-परलाऽऽस्वाद चपलित-चञ्चु-पतङ्ग-कुलाक्रमणाभीक-विनत-शाखा-शाखि-समूह-मालः। सुन्दर कन्दरः पर्वत खण्डः आसीत्।

केन प्रकारेण आधुनिकयुगस्य श्रेष्ठः कादम्बरीकारः गद्यकारः इत्येतद् वक्तुं शक्यते

प्र०७ भारवेः माघस्य च तुलना कार्या ?

उत्तरम् :- संस्कृत महाकाव्य परम्परायां बृहत्त्रयी भारवेः माघस्य च स्थाने महत्त्वपूर्णमस्ति । अत्र आभ्याम् उत्तरे वयं द्वयोः कव्योः परस्परं तुलनां पश्यामः । उभौ महाकाव्यकारौ द्वयोः महाकाव्ययोः प्रसिद्धिः संस्कृत-साहित्ये ऽनुपमा, अत्र वयं तयोः कतिपयाः तुलनाः कुर्यामः ।

(1) द्वयोः कव्योः महाकाव्ययोः कथा स्रोतः महाभारतात् संकलितोऽस्ति ।

(2) द्वयोः ग्रन्थयोः आरम्भः श्री इति शब्देन भवति यथा किरातार्जुनीयस्य आरम्भः "श्रियः कुरूणामधिपस्य पालिनीं" माघकाव्यस्य आरम्भः अनेन प्रकारेण "श्रियः पतिः श्रीमति शासितुं जगत्"

3 किरातार्जुनीयस्य प्रथमे सर्गे वनेचरः दुर्योधनस्य राज्यात् आगत्य युधिष्ठिरं प्रति सन्देशं ~~कथयित्वा~~ कथयित्वा दूतस्य कार्यं करोति माघकाव्ये शिशुपालवधे नारदः आगत्य तादृशमेव सन्देशं कथयति ।

4 किरातार्जुनीयस्य द्वितीये सर्गे युधिष्ठिरस्य भीमस्य द्रौपद्याः च मध्ये राजनीति विषयकः संवादः भवन्ति । शिशुपालवधस्य द्वितीये सर्गेऽपि बलरामस्य श्रीकृष्णस्य उद्धवस्य च मध्ये एकमेव युद्धविषये परामर्शः भवति ।

5 किराते महर्षि वेदव्यासः आगत्य पाण्डवानां मार्गदर्शनं करोति तस्य कथनानुसारेण एव अर्जुनः इन्द्रकील पर्वतं गत्वा शिवस्य आराधनां करोति । माघकाव्ये नारद

द्वारा एतादृशः एव उपदेशः दत्तोऽस्ति ।

6 किराते अर्जुनः इन्द्रकीलपर्वते गत्वा तपस्या करोति शिशुपाल वधे श्रीकृष्णः रैवतक पर्वते विश्रामं करोति ।

7. किराते समासालंकारस्य माध्यमेन हिमालयस्य वर्णनमस्ति एतादृशेन वर्णनं माघकाव्ये रैवतक पर्वतस्यास्ति ।

8 द्वयोः महाकाव्ययोः अप्सरसां विहार वर्णनस्य स्थानं प्राप्तमस्ति ।

9 किराते किरातवेशधारी शिवः अर्जुनमपमानयितुं दूतं प्रेषयति । माघकाव्ये शिशुपालः कृष्णस्य अनादराय दूतप्रेषणं करोति ।

10 किराते अर्जुनस्य किरातरूपधारिणः शिवस्य वाद विवादं भवति माघकाव्ये शिशुपाल दूतस्य सात्यकिनः मध्ये एतादृशं विवादं वयं पश्यामः ।

11 किरातस्य पञ्चदशतमे सर्गे शिशुपालवधस्य एकादशतमे सर्गे चित्रकाव्यद्वारा युद्ध वर्णनमस्ति ।

12 द्वयोः काव्ययोः सूर्योदयस्य, चन्द्रोदयस्य, रात्रेः, सन्ध्याकालस्य ऋतूनां प्रकृतिविभिन्न दृश्यानां यथा स्थाने वर्णनमस्ति ।

13 भारविः सर्गान्तस्य प्रतिसर्गस्य अन्तिमपदे लक्ष्मी इति शब्दस्य प्रयोगं करोति तु माघः प्रति सर्गान्ते श्री इति शब्दस्य प्रयोगं करोति ।

14 द्वयोः वर्णन क्रमे समानता अस्ति ।

15 द्वयोः काव्ययोः सन्धान पूर्व सन्धान सर्गयोः सर्गान्ते ... अतः एतेषां समानतानां कारणेन अपि द्वयोः महाकाव्ययोः पृथक् - पृथक् महत्त्वमस्ति ।

यादृशः चमत्कारः भारवेः काव्ये नास्ति अस्माभिः दृश्यते माघ काव्येऽपि तथापि। माघ भारवेः कृतज्ञः अस्ति। माघः तस्य काव्यात् अनेकानि प्रमाणानि जातानि। तत्रैव कारणं माघ-काव्यं भारवेः काव्यात् उत्पन्नतरां ख्यातिं प्राप्नोति इति कतिपयानामालोचकानां मतं कथितमपि अस्ति "नव सर्ग गते माघे नव शब्दो न विद्यते। अथवा "तावद् भा भारवेर्भाति यावद् माघस्य नोदयः। यथा माघ मासे सूर्य-किरणाः शीतलाः भवन्ति तथैव माघ काव्यसमक्षे भारवि काव्यं प्रभाहीनम्। तथापि द्वयोः महत्त्वं भिन्नं-२ एव। एकस्य प्रीतिः द्वितीयेन सम्भवा नास्ति।

प्रभाहीनं

प्र०२० कालिदासस्य भवभूतिश्च नाटकीय दृष्ट्या तुलना कार्या।

उत्तरम्- कालिदासः प्रतिभा-सम्पन्नः संस्कृत साहित्यस्य कलाकारः। तस्य लेखनी यथा महाकाव्यद्वयमरचयत् तथा त्रीणि नाटकानि अपि तया एव लेखन्या निष्पादितानि सन्ति। संस्कृत नाटक क्षेत्रे या प्रसिद्धि कालिदासस्य अस्ति तादृशी एव भवभूतेः दृश्यते। अत्र इदानीं वयमस्मिन् प्रश्ने द्वयोः नाटककारयोः तुलनात्मक रूपे परयामः। तयोः द्वयोः कव्योः तुलना अनेन प्रकारेण द्रष्टुं शक्यते।

(1) कालिदासः त्रयाणां नाटकानां रचनां कृतवान् तथा एव त्रीणि नाटकानि भवभूतेः रचितानि सन्ति।

2 कालिदासस्य त्रिषु नाटकेषु यादृशी प्रसिद्धि शाकुन्तलस्य अस्ति तादृशी भवभूतेः उत्तररामचरितस्य वर्तते।

3 कालिदासस्य शाकुन्तलं महाभारतात् संगृहीतमस्ति

भवभूतेः च उत्तररामचरितं वाल्मीकि रामायणात् संगृहीतमस्ति ।

4 कालिदासेन शाकुन्तले (अन्य नाटकेषु च) शृङ्गाररसस्य अनुपमा इव प्रदर्शिता यादृशी तादृशी रस इव भवभूतेः उत्तररामचरितेऽपि अस्ति परन्तु तत्र वयं शृङ्गाररसस्य अपेक्षा करुणरसस्याधिक्यं पश्यामः ।

5 कालिदासस्य नाटकेषु प्रकृति चित्रणस्य अनुपमता दृश्यते, तथैव भवभूतेः नाटकेषु प्रकृति चित्रणं चरमोत्कर्षे दृश्यते ।

6 कालिदासस्य नाटकेषु प्रथमन्तु शृङ्गारस्य कामुकता दृश्यते परन्तु तदनन्तरं वियोग ज्वालायां विशुद्धभूत्वा शुद्ध रूपं धारयति ।

7 कालिदासस्य नाटकेषु व्यञ्जना-शक्त्याः आधिक्यमस्ति तत्र भवभूतेः नाटकेषु व्यञ्जनया सह वाच्यार्थस्यापि समुचितं प्रयोगं वयं पश्यामः ।

8 यत्र कालिदासः सीमितानां शब्दानां माध्यमेन विशेष भावानाम् अभिव्यक्तिं करोति, तत्र तादृशी अभिव्यक्तिः भवभूतेः नाटकेष्वपि दृश्यते ।

9 अलङ्काराणां प्रयोगे कालिदासस्योपमा जगत्प्रसिद्धा अस्ति । भवभूतेः उपमासु भिन्नता दृश्यते यत् भवभूतिः मूर्तस्य उपमां अमूर्तेन करोति ।

10 कालिदासस्योपमासु नायिकानाम् अङ्ग प्रत्यङ्गानामुपमा दृश्यते परन्तु भवभूतिः केवलं नायिकानां गुणानामेव उपमां करोति ।

11. कालिदासस्य भवभूतेश्च नाटकेषु नायिका वर्णने भिन्नता दृश्यते । कालिदासस्य नायिकानां बाह्य सौन्दर्यस्य मनोहारकं चित्रणमस्ति परन्तु भवभूतिः नायिकानां अन्तः सौन्दर्यमेव प्रकाशितं करोति ।

12. कालिदासः यत्र कुत्रापि यस्यकस्यापि चित्रणं करोति तस्य चित्रणे सजीवता मिलति एवं लगति यत् वर्णनीयस्य पात्रस्य साक्षात् रूपेण उपस्थितिः भवति । परन्तु भवभूतिः बाह्य सौन्दर्यं महत्वं न दत्वा आन्तरिक सौन्दर्यस्यैव सजीवतां दर्शयति । परन्तु कालिदासवत् स्वाभाविकता तत्र न दृश्यते ।

13. भाषा दृष्ट्या द्वयोर्मध्ये सगता विषमता दृश्यते । कालिदासस्य भाषा यत्र सरला कोमला स्वाभाविकी ललित पदावली युक्ता अस्ति तत्र भवभूतेः भाषा दार्शनिकतया परिपूर्णा श्रम साध्या प्रगल्भा एवं प्रौढा अस्ति । यत्र कालिदासः लोक प्रचलितानां शब्दानां समर्थकोऽस्ति तत्र भवभूतिः पाण्डित्य प्रदर्शने निरतोऽस्ति ।

14. कालिदासः प्रकृतेः मानवीकरणं करोति तस्याः कमनीयता सर्वत्र विद्यमाना भवति । भवभूतिः चित्रणमपि वयं पश्यामः परन्तु तत्र कालिदासवत् सुषमता नास्ति । भवभूतिः प्रचण्ड ग्रीष्मस्य वर्णनं सुन्दरतया करोति ।

15. पुरुषपात्राणां चित्रणे कालिदासः अतीतं पात्रं मानवीयसंस्कारयुक्तं दर्शयति तत्र भवभूतेः पात्रेषु सर्वत्र आदर्शः एव दृश्यते ।

16 स्वाभाविकता याद्रशी कालिदासस्य नाटकेषु दृश्यते तादृशी भवभूतेः नाटकेषु न वयं पश्यामः।

अतः द्वयोः कलाकारयोः मध्ये यत्र अनेकाः समानता सन्ति तत्र वैषम्यमपि वयं पश्यामः। परन्तु द्वयोः कलाकारयोः काव्यद्वारा संस्कृत साहित्यं पुष्पितं पल्लवितं।

प्र०2 महाभारतस्य रचना कालः वर्ण्यविषयस्य च सम्बन्धे आलोचनात्मकः उत्तरं देयम्।

उत्तरम् :- रामायणस्य पश्चात् संस्कृत साहित्ये महाभारतस्य स्थानमस्ति आकार प्रकार दृष्टया अयं ग्रन्थः विश्वस्य ग्रन्थेषु विशालतमः अस्ति। अस्य रचयिता कृष्ण द्वैपायनः वेद व्यासोऽस्ति। ग्रन्थोऽस्मिन् एकलक्षं अनुष्टुप छन्दात्मके रूपे वयं पश्यामः। अस्य ग्रन्थस्य प्रसिद्धि शत साहस्री संहिता इति रूपेणापि अस्ति। अस्य ग्रन्थस्य काल सम्बन्धे विद्वषाम् अनेकानि मतानि सन्ति। कतिपयानां तु इदं कथनमस्ति यत् इयं रचना एकस्यैव कालस्य एकस्य कवि द्वारा रचिता अस्ति। परन्तु केचन विद्वांसः अस्य विशालतमं रूपं दृष्ट्वा अस्य मतस्य समर्थकाः सन्ति यत् समये-2 विभिन्न कवीनां लेखकानां च माध्यमेन अस्य आकार प्रकार वृद्धिः जाता। तेषामिदमपि कथनमस्ति यत् भाषा दृष्टया कला दृष्टया च अनेक स्थलेषु परिवर्तनं दृश्यते। महाभारतस्य पूर्व नाम जयः आसीत्।

अस्य सङ्केतः ग्रन्थस्यारम्भे एव दृश्यते परन्तु तदानीं अस्य ग्रन्थस्य श्लोक संख्या (अष्ट) अष्टाशीति सहस्राणि आसीत् । कालान्तरे अस्य नाम महाभारत सञ्जातम् । अतः महाभारतस्य कर्ता व्यासः इति द्वयोः सम्बन्धे अधुनापि एकं मतं नास्ति । महाभारतस्य यत् रूपं वयमिदानीं पश्यामः । तस्य रचना ईशातः त्रिसहस्रवर्षपूर्वमभवत् । महाभारतस्य अनेके अंशाः वैदिककालेऽपि दृश्यन्ते । अतः इयं रचना सम्पूर्ण दृष्ट्या सरला अस्ति । कतिपयानामिदं कथनं यत् महाभारते यानि कथानकानि सन्ति तत्र अनेकता अपि दृश्यते ।

पर्वाणि

अष्टादश पर्वसु विभक्तोऽयं ग्रन्थः चन्द्रवंशस्य कौरव पाण्डवानां च विस्तृतं वर्णनं ~~[illegible]~~ करोति यथा आदि पर्वे कौरव पाण्डवानामुत्पत्तिः । द्वितीये द्यूतक्रीडा तथा च पाण्डवानां वनवासः तृतीयेऽपि वनवासस्य चर्चा अस्ति । चतुर्थे पाण्डवानामज्ञातवासः, पञ्चमे दूतरूपेण श्रीकृष्णस्य कौरवानां सभायां गमनं शान्ति प्रस्तावः । षष्ठे अर्जुनाय गीतायाः उपदेशः युद्धस्यारम्भः भीष्मस्य च मृत्युः सप्तमे अभिमन्युः वधः, अष्टमे कर्णेन सह युद्धं तथा च तस्य वधः नवमे शल्यस्य आधिपत्यतायां युद्धं, दशमे ~~[illegible]~~ [illegible] विलापः एकादशे अपि च तादृशी स्थितिः द्वादशे भीष्मेण युधिष्ठिरं प्रति उपदेशः, त्रयोदशे धर्मस्य नीतेश्च उपदेशः, चतुर्दशे युधिष्ठिरस्य अश्वमेधयज्ञः, पञ्चदशे गान्धारी सहित धृतराष्ट्रस्य वनं प्रति प्रवेशः । षष्ठे षोडशे

यादवानां मुसलेन मिथः विनाशः निर्वेदेन पाण्डवानां
हिमालयं प्रति गमनं भवति। अष्टादशशतमं च
पाण्डवानां स्वर्गारोहणम् [illegible] महाभारतं
इतिहासचरितानां विशालं कुक्षमस्ति। पात्राणां-
चित्रणं स्वाभाविकमेव तथा मनोरममस्ति। पात्राणां
निदर्शनं जीवनचरितं अनुपमम्, विविधचरितयुक्तं
[illegible] तथा च औचित्यं [illegible]
विविधानां वर्णनानां संग्रहः खलु महाभारतं नाम
विशालं ग्रन्थः। [illegible] द्वारा [illegible] पर्यन्तं
साहित्यकाराणां विशेषरूपेण भारतीयानां मार्गदर्शनं
करोत्यस्ति एव।

प्र०२२ नाटककारेषु भासस्य स्थानं निर्धारणीयम् ?

उत्तरम् :- विंशतिशताब्द्याः प्रारम्भं यावत् विद्वद्भिरिदमेव मन्यते स्म यत् महाकविः कालिदासः एव संस्कृतसाहित्यस्य प्रथमनाटककारोऽस्ति । परन्तु विद्वान् मैक्डानेल महाभागः अपि स्वकीये ग्रन्थे "संस्कृतसाहित्यस्य इतिहासे" अस्यैव मतस्य समर्थनमकरोत् । परन्तु तस्मिन्नेव काले श्रीगणपतिशास्त्रिणां द्वारा भासरचितानां त्रयोदशरूपकाणां 1909 ई० हस्तलिपयः लब्धाः । तेन च वस्तुस्थितिः सर्वेषां समक्षे एतादृशी जाता यत् एतानि त्रयोदशनाटकानि भासरचितानि एव सन्ति । तेषां च रचनाकालः कालिदासात् पूर्वमस्ति । यद्यपि भासद्वारा रचितानि नाटकानि संक्षिप्तानि सन्ति परन्तु तेषां सर्वेषां आधारः पौराणिकोऽस्ति, रामायणस्य कथानकमाश्रित्य प्रतिमा तथा च अभिषेकमिति द्वयोः नाटकयोः रचना जाता । महाभारतस्य कथानकानि आदाय बालचरितं, पञ्चरात्रं, मध्यमव्यायोगः, दूतवाक्यं, दूतघटोत्कचं, कर्णभारं, ऊरुभङ्गमेतानि सन्ति । उदयनस्य सम्बन्धितेन कथानकेन युक्तं स्वप्नवासवदत्तम् प्रतिज्ञायौगन्धरायणमिति नाटकद्वयं अस्ति । तथा च अविमारकं दरिद्रचारुदत्तमिति द्वयोः कथानकं काल्पनिकरूपकमस्ति । वस्तुतः ~~[illegible]~~ स्वप्नवासवदत्तम् तस्य प्रसिद्धं नाटकमस्ति । अन्यानि तु सर्वाणि एकाङ्कानि इति रूपेण आदृतानि सन्ति । भासः कथावस्तुविन्यासे, पात्राणां चरित्रचित्रणे प्रतिभासम्पन्नः नाटककारोऽस्ति । तस्य नाटकानां अनुशीलनेन इदं स्पष्टं भवति यत् तस्य ~~नाटकानां [illegible] कथावस्तु~~ च नाट्यकृतीनां कथावस्तूनां दृष्टौ बहुमुखी ~~[illegible]~~ प्रतिभासम्पन्नत्वमस्ति ।

नाटकद्वयमस्ति

तस्य नाटकेषु विविधता एवं तस्य प्रतिभायाः मौलिकता अस्ति। परन्तु नाटकेषु स्वप्नवासवदत्तम् तथा च प्रतिज्ञायौगन्धरायणेन उच्चकोटेः सम्मानमस्ति। इदमपि भासस्य सम्बन्धे कथयितुं शक्यते यत् धारानामनन्यता, सार्थकता, घातप्रतिघातानां च दृष्ट्या तस्य सफलता सन्देहरहिता अस्ति। पात्राणां चरित्रचित्रणे एव निपुणतायाः पूर्ण परिचयः दत्तः। भासस्य पात्रेषु सजीवता अस्ति, स्वप्नवासवदत्ते उदयनस्य चरित्रे गम्भीरता धीरोदात्तता च दृश्यते। भासस्य नाटकेषु रसानां योजना अपि प्रसङ्गानुकारी पात्रानुकारिणी तथा च निरहङ्कारिणी अस्ति। यद्यपि विभिन्न रसानां सन्निवेशः तस्य नाटकेषु मिलति तथापि वीररसस्य शृङ्गाररसस्य च प्रधानता एव मुख्यरूपेण दृश्यते। तस्य सम्वादेषु सजीवता सरलता सरसता तथा च प्रभावोत्पादकता अस्ति। तस्य काव्यशैली अक्लिष्ट कल्पना सहिता तथा च सर्वथा स्पष्टा अस्ति। यद्यपि तस्य नाटकेषु अनेकाः एतादृशाः प्रयोगाः सन्ति। अलंकार प्रसङ्गे आदिश्यन् उपमायाः उत्प्रेक्षायाः इत्यादीनाम् अलंकाराणां सफलः प्रयोगोऽस्ति। कतिपयानां पात्राणां रङ्गमञ्चे मृत्युदर्शनमपि अस्ति तथापि तस्य नाटकेषु अभिनेयता अस्ति। अतः नाट्यकला दृष्ट्या भासः सफलः नाटककारः अस्ति।

प्र०23 नाटककारेषु राजशेखरस्य स्थानम्।

उत्तरम् :- राजशेखरः संस्कृत साहित्ये कवि रूपेण नाटककाररूपेण च प्रसिद्धोऽस्ति। बालरामायणं बालभारतं विद्धशालभञ्जिका कर्पूरमञ्जरी इति चत्वारि तस्य नाटकानि "हरविलासः" ...

महाकाव्यं तथा च तस्य कीर्तिः पताकायाः आधार भूतः ग्रन्थः काव्यमीमांसाऽस्ति। नामानुसारेण काव्यमीमांसा इति ग्रन्थो काव्यस्य मीमांसा अर्थात् आलोचना अस्ति। आलोचनायां राजशेखरेण काव्यस्य काव्य-पुरुषरूपेण उल्लेखः कृतोऽस्ति, प्राप्त प्रमाणानामाधारेण राजशेखरस्य समयः दशम् शताब्दयाः प्रारम्भः अस्ति। स्वयं च तेन स्वकीयेषु ग्रन्थेषु स्वपरिचयः दत्तोऽस्ति। तदनुसारेण तस्य जन्म महाराष्ट्रस्य यायावार नामकः इति क्षत्रिय जातौ अभवत्। पितुः नाम दुर्दुक माता च शीलवती आसीत्। तस्य पूर्वजेषु अनेके यशस्विनः विद्वांसः आसन्। चौहान वंशस्य अवन्तिसुन्दरी इति नाम्न्या महिलया सह तस्य विवाहः अभवत्। महाराष्ट्र त्यक्त्वा कान्यकुब्जनगरे एव अस्य जीवनं यापितम्। तस्य बालभारतं बालरामायणं च द्वे विशालकाये नाटके स्तः। परन्तु इदानीं बालभारतस्य अंशमात्रः लभ्यते। राजशेखरस्य नाट्य कला काव्यकला च सफला अस्ति। काव्य मीमांसायां काव्य पुरुषस्य कल्पना तस्य नूतना सृजना अस्ति काव्य मीमांसायां यत्र कवीनां विस्तृतः उल्लेखः तत्र सफलनामसफला-नां कवीनां विवरणमपि अस्माभिः लभ्यते। तस्य नाटकेषु हास्य-रसस्य न्यूनता नाट्य कौशलस्य अभावः दृश्यते।

प्र०25 संस्कृत साहित्ये कथा साहित्यस्य विकास क्रमः देयः।

उत्तरम् :- संस्कृत साहित्ये आख्यायिका साहित्यं कथा साहित्यं च इति द्वयोर्मध्ये पृथकता स्थापनस्य प्रयासः अनेकैः विद्वद्भिः कृताः। परन्तु भरतेन पूर्वं केनापि द्वयोर्मध्ये स्पष्ट रूपेण भेदः प्रदर्शितः। यद्यपि भामहः द्वारा काव्यालंकारे द्वयोर्मध्ये भेदप्रदर्शनं कृतमस्ति

यत् पत्र आख्यायिका वास्तविक कथारूपेण भवति, कवि स्वयं वक्ता भवति उच्छ्वासेषु तस्य कथा विभक्ता भवति आदौ अन्ते च भविष्यत्कालस्य घटनानां सूचनार्थं श्लोकरूपेण उपलब्धा भवति परन्तु कथा कवि कल्पना— जनिता भवति तस्य च कथानाम आख्यायिका यत् विभाजित न भवति। आचार्य दण्डिनः कथनानुसारेण हर्षचरितं यत्र आख्यायिका ग्रन्थः तत्र कादम्बरी कथा रूपेण मण्डिता अस्ति। अतः तस्य कथनमस्ति यत् आख्यायिका कथावस्तु प्रख्यात भवति अथवा ऐतिहासिकं परन्तु कथा कवि कल्पना प्रसूता भवति। अतः द्वयोर्मध्ये अयमेव भेदः।

पाश्चात्य साहित्येन प्रभाविताः अनेके विद्वांसः कथयन्ति यत् कथा साहित्यं पाश्चात्यानां सम्पत्तिः अस्ति। तेषां भारतीयाः विद्वांसः अथवा कथाकाराः कथा साहित्यस्य प्रणयने सफलाः अभवन्। पाश्चात्य विद्वान् स्विकीये ग्रन्थे A History of Sanskrit Literature स्पष्टं करोति यत् वैदिक कालात् एव भारतीयानां जीवने अनेके कथाः प्रचलिता आसन् तासु कथासु अद्भुत कथा लोक कथा, कल्पित कथा अथवा पशु कथा एतादृशाः प्रकाराः आसन्। ऋग्वेदे यद्यपि स्पष्टरूपेण पशु पक्षीणां स्पष्टाः कथाः न सन्ति परन्तु अनेकासु उपमासु यथा दर्दुर ~~उपमासु~~ ध्वनिना सह ब्राह्मणानां वेद मन्त्रोच्चारणस्य तुलना इत्यादिरूपेण मिलति। हंसानां मध्ये विभिन्न जलचर पक्षीणां मध्ये एतादृशाः सङ्केताः सन्ति। महाभारते पशुपक्षीणां अनेकाः स्पष्टाः कथाः उपलब्धाः भवन्ति न केवल शान्ति पर्वणि अपितु अन्य ~~क~~पर्वसु अपि

ताः कथाः दृश्यमानाः सन्ति । अतः ब्राह्मण ग्रन्थेषु उपनिषत्सु पुराणेषु महाभारते रामायणे च कथा साहित्यस्य प्रचारः प्रसारः सञ्जातः । तत्पश्चात् च लोकप्रचलितानां धारणानामाधारेण अनेककथानां सृजनमभवत् । लौकिक जीवने धार्मिक जीवने मनोरञ्जनस्य दृष्ट्या अनेकाः कथाः उपलब्धाः सन्ति नीति कथाः तथा च लोककथा इति द्वौ भेदौ एव कथा साहित्यस्य स्तः । नीतिकथासु अनेकाः कथाः प्रचलिताः सन्ति तेषु पञ्चतन्त्रम्, हितोपदेशादि नीति ग्रन्था वर्तते । बृहत्कथा मञ्जरी वेताल पञ्चविंशति सरित्सागर सिंहासनद्वात्रिंशिका, शुकसप्तति, इत्यादयः लोककथा मण्डिताः ग्रन्थाः सन्ति । अतः समये-2 प्राचीन कालात् अद्यावधि पर्यन्तं कथा-साहित्यः न्यूनाधिकरूपेण सर्वेषु कालेषु उपलभ्यते स

१ पञ्चतन्त्रम् :-

विचारकाणां मतानुसारेण नीति विषयकस्य कथा ग्रन्थस्य पञ्चतन्त्रस्य न केवलं भारते अपितु समस्त विश्वे महत्वपूर्णं स्थानमस्ति । अस्य ग्रन्थस्य प्रसिद्धिः अनेन कारणेनापि दृश्यते यत् विश्वस्य अनेकासु भाषासु अस्य कथा ग्रन्थस्य अनुवादः अभवत् । (अयं नीति शास्त्रस्य मनोहरः शिक्षाप्रदः ग्रन्थोऽस्ति ।) नामानुसारेण अस्मिन् ग्रन्थे पञ्चतन्त्राणि सन्ति । विश्वे द्विशताधिकानि संस्करणानि अस्य ग्रन्थस्य मिलन्ति । यूनानदेशे स्पेनदेशे लेटिन-देशे, जर्मन देशे इत्यादिषु देशेषु अयं ग्रन्थः सम्मानस्य दृष्ट्या दृश्यते पठ्यते च । पञ्चतन्त्रस्य मूल-प्रति अधुनापि उपलब्धं नास्ति । अतः अस्य मूलद्र-ष्टुः सम्बन्धे निश्चयात्मकं रूपेण किञ्चित् कथयितुं न शक्यते । अनेकेषां प्रमाणानामाधारेण

पञ्चतन्त्रस्य रचना-कालः तृतीय शताब्दी इति स्वीकर्तुं शक्यते। पञ्चतन्त्रे विभिन्नानां नीति सम्बन्धीनां कथानां मुख्यं स्रोतः अस्ति। पञ्चतन्त्रस्य रचयिता विष्णुशर्मा नामकः पण्डितः इति कथ्यते। कश्मीर प्रान्ते दक्षिण भारते वा अस्य ग्रन्थस्य रचना स्थानमासीत्। सरलानां कथानां माध्यमेन नीति विषयकस्य ज्ञानस्य अवबोधनमस्य ग्रन्थस्य विशेषता अस्ति। कथ्यते यत् तासां नीति विषयकानां माध्यमेन विष्णु-शर्माद्वारा नृपस्य मूर्ख पुत्राः नीति-निपुणाः विद्यासम्पन्नाः च कृताः आसन्।

व्यावहारिक

पञ्चतन्त्र द्वारा न केवलं शिक्षा प्रदाने व्यवहारिक जीवनस्यापि उपलब्धिः भवति। प्रति तन्त्रे एकस्याः कथायाः मध्ये अनेकाः कथाः अन्तर्भूताः सन्ति। मित्र भेदः, मित्रलाभः, सन्धि-विग्रह लब्धप्रणाशः तथा च अपरीक्षित कारके एते सन्ति मुख्य भागाः। अतः कथा गद्ये एव लिखिताः सन्ति। सूक्तयः पद्ये तथा च अनेकेभ्यः ग्रन्थेभ्यः नीति-प्रदाः, शिक्षा-प्रदाः श्लोकोऽपि पञ्चतन्त्रे संगृहीताः सन्ति। अतः कथा साहित्यस्य अनुपममुदाहरणं पञ्चतन्त्रम्।

कृतमति

२. हितोपदेशः :-

पञ्चतन्त्रानन्तरं हितोपदेशः नामकः लघुग्रन्थः कथा साहित्ये उल्लेखनीयोऽस्ति। पञ्चतन्त्रस्य अनुकरणे रचितः अयं लघु ग्रन्थः पण्डित नारायण द्वारा विरचितोऽस्ति। नारायण शर्मणः आश्रयदाता धवल चन्द्रः आसीत्। चतुर्दश शताब्द्यां हितोपदेशस्य एका पाण्डुलिपि प्राप्ता अभवत्। तदनुसारेण हितोपदेशः तस्मात् पूर्वकालस्य रचना अस्ति। आङ्ग्ल भाषायाः विद्वान् कीत महाभागः नवम शताब्द्याः समाप्तौ एव अस्य ग्रन्थस्य कालं स्वीकरोति। हितोपदेशस्य

समाप्ति

प्रस्तावनायां उल्लिखितमस्ति - -
" पञ्चतन्त्रात् तथान्यस्माद् ग्रन्थादाकृष्य लिख्यते "
अस्मिन् ग्रन्थे चत्वारिंशत् कथाः संकलिताः सन्ति तेषु पञ्चविंशति कथाः पञ्चतन्त्रात् एव गृहीताः सन्ति। अस्य ग्रन्थस्य विभाजनं चतुर्षु भागेषु मित्रलाभः सुहृद्भेदः, विग्रहः तथा च सन्धिः एतेषु चतुर्षु भेदेषु लभामहे। प्रथमस्य द्वौ परिच्छेदौ पञ्चतन्त्रात् एव गृहीतौ स्तः। पञ्चतन्त्रस्य अपेक्षया अस्मिन् पद्यानां आधिक्यमस्ति। कतिपयानि पद्यानि कामन्दकीय नीति ग्रन्थात् संकलितानि सन्ति। परन्तु पद्यानां इदमाधिक्यं कथा प्रवाहे बलाचेत् बाधितमुपस्थापयति। सरलया: सुबोधभाषाशैल्याः कारणात् हितोपदेशस्य पठनपाठनमधिकं भवति। नीति विषयकाः उपदेशाः पदे-पदे अस्मिन् ग्रन्थे पदे-पदे मिलन्ति।

न धर्मशास्त्रं पठतीति कारणं न चापि वेदाध्ययनं दुरासनः
स्वभाव एवात्र तथातिरिच्यते यथा प्रकृत्या मधुरं गवां पयः

अतः पञ्चतन्त्रस्य अपेक्षया व्यवहारिके जीवने समाजे च हितोपदेशस्य प्रचारः प्रसारः आधिक्येन दृश्यते। अस्य ग्रन्थस्य उपयोगितां दृष्ट्वा अनेक विश्व विद्यालयेषु अयं ग्रन्थः पाठ्यक्रमे निर्धारितोऽस्ति।"

3. मृच्छकटिकम् :-

संस्कृत नाट्य साहित्ये मृच्छकटिकस्य अत्यन्तं महत्त्वपूर्णं स्थानमस्ति। इदं संस्कृत साहित्ये एतादृशं विरलं नाटकमस्ति यत्र प्रणयकथात्मक प्रकरणानि धूर्त संकुलभावः तथा च राजनीतेः वातावरणं एकस्मिन् एव ग्रन्थे दृश्यते। मृच्छकटिकस्य प्रस्तावनायां लिखितमस्ति यत् अस्य रचना द्विजमुख्य शूद्रकद्वारा कृतोऽस्ति। शूद्रकः वेदानां विविध विद्यानां कलानां च पारंगतः ~~पण्डितोऽसीत्~~ पण्डितो आसीत्। तेन सिंहासने

सापुत्रस्य अभिषेकं कृत्वा अग्नौ प्रवेशः कृतः।

कतिपयानामिदं मतमस्ति यत् इदं रचना अनेकेषां लेखकानां सामूहिकः प्रयासोऽस्ति। परन्तु नूतनानां प्रमाणानामाधारेण शूद्रकरेव अस्य रचयिता अस्ति। इदं नाटकं विशालाकारमस्ति। मृच्छकटिकं चरित्र-चित्रण प्रधान नाटकमस्ति। यद्यपि पात्राणामाधिक्यता अस्ति परन्तु कुत्रापि केनापिदपि पात्रेण सह नाटक-कारेण अन्यायः न कृतः। समाजस्य सर्वेषां वर्गाणां प्रतिनिधित्वमस्ति। अस्माकं समाजे ये गुणाः अथवा दोषाः विद्यमाना सन्ति तेषां प्रतिबिम्बं वयं अस्मिन् नाटके पश्यामः। अस्य नाटकस्य पात्राणि वर्ग विशेषस्य प्रतिनिधित्वं न कुर्वन्ति अपितु सर्वेषां पात्राणां व्यक्तिगत सत्ता विद्यमाना अस्ति। अस्मिन् नाटके प्रकृति चित्रणं तु नाममात्रमेव दृश्यते। दार्शनिक भावना नाटके पदे-२ दृश्यते।

अस्य नाटकस्य मुख्य कथानकं चारुदत्तेन सह वसन्तसेनायाः प्रणयः सङ्कलितमस्ति। इदं धारमाप्रधानं रूपकं रसेषु वयमस्मिन् नाटके शृङ्गारस्य करुणस्य च द्वरा विशेष रूपेण प्राप्नुमः। यद्यपि नाटकस्य भाषा प्राकृता अस्ति तथापि अल्प संस्कृतज्ञाः जनाः इदं नाटके सरलतया अवबोधुं शक्नोति।

इति शुभमस्तु।